ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

वर्षम् 72
अङ्कः -04
माघमासः
विक्रमाब्दः 2078
युगाब्दः 5123
फरवरी, 2022

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | श्रीसूर्यनारायणाष्टकम् | पं. नथमलशास्त्री दाधीचः | ६ |
| ३ | क्षमया किं न सिध्यति | डॉ. योगिनी एच. व्यास | ७ |
| ४ | ऋतुकाव्यम् | कविरश्मि- श्रीव्रजकिशोरत्रिपाठी | ८ |
| ५ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ११ |
| ६ | अध्यापकछात्राणां व्यक्तित्वे ऑनलाइनशिक्षायाः आभासीयशिक्षायाः प्रभावः | डॉ. सुन्दरलालशास्त्री | १६ |
| ७ | छन्दोबद्धगज़लकाव्यस्तबकः | डॉ. हर्षदेवमाधवः | १९ |
| ८ | श्रीमज्जवाहरयशोविजयमहाकाव्ये वृत्तिप्रयोगः | दयाशंकर शर्मा | २० |
| ९ | च्योतेयन्नयने ननु ( शिवस्तुतिः ) | कौशलतिवारी | २१ |
| १० | आभासीयवर्गस्य परिप्रेक्ष्ये अभिक्रमिताधिगमः | बोलतीराम मीना | २२ |
| ११ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | २५ |
| १२ | पाठक-प्रतिक्रिया | डॉ. अञ्जना शर्मा | २७ |
| १३ | नारीस्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १४ | आयुर्वेद-स्तम्भः | प्रो. बनवारीलालगौडः | ३० |
| १५ | संस्कृत-समाचाराः | | ३५ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रबन्ध सम्पादक)

ISSN2249-698X

॥ श्रीशः ॥

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ

स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )

स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः

श्रीश्यामशरणदेवाचार्यः

( निम्बार्कपीठं, सलेमाबादः )

स्वामी रामभद्राचार्यः

( चित्रकूटः )

स्वामी अवधेशानन्दगिरिः

( हरिद्वारम् )

महन्तः गोविन्ददेवगिरिः

( पुणे )

स्वामी राघवाचार्यवेदान्ती

( अग्रपीठं रेवासा )

महन्तः प्रतापपुरी

( तारातरामठं, बाडमेरम् )

श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः

देवर्षिकलानाथशास्त्री

सम्पादकः

प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः

सुदामा शर्मा

सहसम्पादकौ

प्रोफेसर सुरेन्द्रकुमारशर्मा

शिवशरणनाथत्रिपाठी

सहायकसम्पादकः

डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः

प्रोफेसर शङ्करप्रसादशुक्लः

उपाध्यक्षौ

डॉ. नाथूलालसुमनः

डॉ. नन्दसिंहनरूकाः

सचिवः

डॉ. सुधीरकुमारशर्मा

सहसचिवः

कृष्णाकुमारशर्मा

व्यवस्थापकः

राजीवदाधीचः

9352030291

पत्रिकाप्रकाशनेऽधिगतमार्थिकं सौजन्यं राजस्थान-संस्कृत-अकादमीतः

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाईट : www.bhartipatrika.org

वर्षम् 72 अङ्कः -04
माघमासः
विक्रमाब्दः 2078
युगाब्दः 5123
फरवरी, 2022

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# पण्डितो दानशीलश्च माघो विजयतेतराम्

...✍ प्रोफेसर श्रीकृष्णशर्मा

राजस्थानप्रान्तस्येदं सौभाग्यं यदत्र सप्तमशताब्द्या उत्तरार्धे जालौरमण्डलान्तर्गतं '**भीनमाल**'नगरं महाकविर्माघः स्वजन्मनाऽलञ्चकार। अयमेव कविषु प्रथमो महाकविर्यस्य कहाकाव्यं '**<u>शिशुपालवधम्</u>**' इति स्वनाम्ना '**<u>माघ</u>**' इत्यपरनाम्ना ख्यातिं जगाम। कवेरस्य जन्म 'माघ' मासस्य पौर्णमासी-तिथौ अभवत्। अस्य नामकरणमपि 'मघा' नक्षत्रस्य प्रथमचरणे जातत्वाद् 'माघ' इति ज्योतिर्विद्भिर्विहित-मिति विज्ञायते। किंवदन्ती प्रथिता वर्ततेयद् माघस्य जन्मकुण्डलीनिर्माणानन्तरं पृष्टाः सन्तो ज्योतिर्विदः कथयामासुर्यदयं बालो महान् **विद्वान्** विमलमतिर्भविष्यति, तथापि दारिद्र्यात् सन्ताहितोऽपि भविता, अतोऽस्य नाम 'माघ' इति। मा=लक्ष्मीः, तया हन्यते=सन्ताड्यतेऽसौ=माघः, मा+अघः=माघः, पापबुद्धिर्यस्य नास्तीति यावदिति व्युत्पत्तेः। फलतोऽतिशयवैदुष्येऽपि पर्यवसाने दानशीलं माघं दारिद्र्यं पीडयत्येव। अतस्तेनोक्तम्-

**'बुभुक्षितैर्व्याकरणं न भुज्यते,**
**पिपासितैः काव्यरसो न पीयते।**
**न विद्यया केनचिदुद्धृतं कुलम्,**
**हिरण्यमेवार्जय निष्फलाः कलाः'।। इति।**

भोजप्रबन्धे कथैषा प्रचलति यद् महाकवि-र्माघोऽत्यन्तं दानशीलः सन् स्वकीयां सर्वामपि सम्पत्तिं याचकेभ्यो व्यतरत्। तेन च निर्धनः सञ्जातः। विवशो भूत्वा सः श्लोकमेकं निर्माय राजानं भोजाख्यं प्रापणाय निजभार्यां प्रेषयामास। माघपत्नी पत्युराज्ञानुसारं तं श्लोकं राज्ञः समक्षं प्रस्तुतवती। स च श्लोकः आसीत्-

**कुमुदवनमपश्रि श्रीमदम्भोजखण्डम्,**
**त्यजति मुदमुलूकः प्रीतिमाँश्चक्रवाकः।**
**उदयमहिमरश्मिर्याति शीतांशुरस्तम्,**
**हतविधिलसितानां ही विचित्रो विपाकः।। इति।**

अस्मिन् श्लोके '**ही**' पदप्रयोगपाटवं वीक्ष्य अथ च माघकवेर्विधिविपाकवैचित्र्यात् जगद्वैचित्र्यमिति व्यंग्यमवबुध्य राजा भोजो लक्षपरिमितांमुद्रां समर्पितवान्। सा सर्वाऽपि मुद्रा दानशीलमाघस्य दानशीलपत्न्या मार्गे एव याचकेभ्यो प्रदत्तेति ज्ञात्वा प्रसन्नो माघः पुनरपि गृहद्वारि याचकान् वीक्ष्य अर्थाभावात् किञ्चिदपि दातुमसमर्थः खिन्नो भूत्वा स्वप्राणान् प्रेरयति -

**व्रजत व्रजत प्राणारर्थिभिर्व्यर्थतां गतैः।**
**पश्चादपि च गन्तव्यं क्व सार्थः पुनरीदृशः।।**
**अर्थाः न सन्ति न च मुञ्चति मां दुराशा।**
**त्यागान्न संकुचति दुर्ललितं मनो मे।।**
**याच्ञा च लाघवकरी स्ववधे च पापम्।**
**प्राणाः स्वयं व्रजत किं नु विलम्बितेन।।**

इत्येवमुक्त्वा महाकविर्माघः स्वप्राणान् तत्याज। वस्तुतो दानिनो धनहीनावस्थायां विचित्रैव मनोदशा

ब्रोभवीति। स च कामयते मरणपि।

महाकविर्माघो जीवने यथा धनसञ्चयस्यावश्यकतां प्रतिपित्सति तथैव दानशीलतायाः महिमानमपि गायति। तथा हि-

**क्षुत्क्षामः पथिको मदीयभवनं**
**पृच्छन् कुतोऽप्यागतः।**
**तत् किं गेहिनि! किञ्चिदस्ति यदयं**
**भुङ्क्ते बुभुक्षातुरः।**
**वाचस्तीत्यभिधाय नास्ति च पुनः**
**प्रोक्तं विनैवाक्षरैः,**
**स्थूल-स्थूल विलोल-लोचन-जलै**
**र्बाष्पम्भसां बिन्दुभिः।।**

कमपि गृहागतम् अतिथिं वीक्ष्य कश्चन दानवीरः दरिद्रः तस्यातिथेः सत्कारार्थं स्वभार्यां पृच्छति- 'अस्ति किञ्चिद् भोज्यम्' इति। तदाऽतिथि-सत्कारपरायणा तत्पत्नी वाचा तु 'अस्ती' ति कथयति, परं पृथिव्यां पातितैः स्थूल-स्थूलविलोल-लोचनजलैः शब्दोच्चारणं विनैव भोज्याभावस्य गृहदशां स्फुटतया प्रकाशयतीत्याशयः।

विलक्षणां वैदुषीमादधानोऽयं निश्चप्रचं पाण्डित्यक्षेत्रे कालिदासादिमहाकवीन् अपि अतिशेते इति निगदितुं पार्यते। महाकविः कालिदासो मूलतः कविरस्ति। भारवी राजनीतौ व्यावहारिकं प्रामाण्यं भजते। भट्टिः केवलं वैयाकरणः। हर्षोऽपि दार्शनिकक्षेत्रेऽधिकः ख्यातः। परमयं महाकविः सर्वत्र नव-नवोन्मेषशालिनीं बुद्ध्यात्मिकीं प्रतिभामावहन् व्याकरण-दर्शन-राजनीति-संगीतालंकार-कामशास्त्रेषु अप्रतिहगत्या स्वलेखनीं सञ्चालयति। दृश्यतां वाचयपरिवर्तनविषये माघपण्डितस्य काचिन्मनोहरा प्रकल्पना, यथा -

**केवलं दधति कर्तृवाचिनः प्रत्ययानिह,**
**न जातु कर्माणि।**
**धातवः सृजति-संह्लशास्तयः**
**स्तौतिरत्र विपरीतकारकः।।**

भगवतः श्रीकृष्णस्य विषये सृज्, हृञ्, शास्-एते धातवस्तु कर्तृवाच्ये एव प्रयुज्यन्ते, यथा- हरिः सृजति, संहरति शास्ति वेति। किन्तु 'ष्टुञ्' स्तुतौ धातुः सर्वत्र विपरीतकारकेऽर्थात् कर्मकारके एव प्रयुज्यते- 'स्तूयते हरिः' 'जनो हरिं स्तौति' इत्याशयः। एवमेव धातूनामनेकार्थत्वम्, निपातानां द्योतकत्वमित्यादयो बहवो नियमाः काव्यसरण्या प्रदर्शिताः।

अनेनेदमायातं यद् महाकविर्माघो न केवलं कविरेवापितु 'पण्डितकविः' 'दानशीलःकविः' इति।

महाकवेरस्य माघपूर्णिमायां माघजयन्ती अस्मिन् मासे। अतो माघजयन्त्यवसरे वयं हार्दिकान् श्रद्धाञ्जलीन् समर्पयन्तोऽन्तःकरणेन स्मरामः।

**व्याकरणपीठाध्यक्षचरः,**
**जगद्गुरु-रामानन्दाचार्य-राजथान-संस्कृत-विश्वविद्यालयः,जयपुरम्,**
**दूरभाषाङ्काः 8386943655**

# श्रीसूर्यनारायणाष्टकम्

(सौभाग्यारोग्यदं स्तोत्रम्)

❑ पं. नथमलशास्त्री दाधीचः

सूर्यनारायणं वन्दे काश्यपं कनकप्रभम्।

शंखचक्रधरं देवमूर्जस्वन्तं महाद्युतिम्।।१।।

प्रातः समुद्यन्तमवेक्ष्य देवं दिवाकरं पद्मविकासहेतुम्।

प्रतप्तहेमाभनिभं प्रदीप्तं प्रणौमि भक्त्या तपनं

तमोऽरिम्।।२।।

मनस्विनो मन्त्रविदो ह्ययजस्रं षष्टिसहस्राणि च

बालखिल्याः।

ब्रह्मर्षिवर्याः पुरतः स्तुवन्ति रथस्थमादित्यमहं

नमामि।।३।।

सकलभुवनभर्ता विश्ववन्द्यो विवस्वान्,

गहनतिमिरहर्ता प्राणवायुप्रदाता।

परहितरतिमूर्तिः सर्वभूतात्मभूतः,

सुरनरमुनिसिद्धैः स्तूयते देवदेवः।।४।।

सहस्ररश्मिर्भगवान् ग्रहेशो विभावसुर्यः सविता

विधाता।

प्रभाकरः पापहरः प्रजानामपाम्पतिर्मां प्रपुनातु

सूर्यः।।५।।

ब्रह्माविष्णुशिवात्मकं गुणमयं भक्त्या प्रसन्नं विभुं,

चिन्ताशोकविनाशनं सुखकरं दारिद्र्यदुःखापहम्।

आत्मोत्साहविवर्धनं प्रतिपदं सौभाग्यशान्तिप्रदं

आरोग्याभयदं भजामि सततं बुद्धिप्रदं भास्करम्।।६।।

कर्ता ऋतूनां भवरोगहर्ता दयानिधिर्दिव्यगुणाकरश्च।

आनन्ददो लोकहिते प्रवृत्तो नमस्कृतो मे वरदोऽस्तु

नित्यम्।।७।।

मेरुं ध्रुवं विष्णुपदं तथोच्चं सप्तर्षिसंघं ग्रहमण्डलञ्च।

परिभ्रमन्तं द्युमणिं प्रचण्डं भजामि भानुं भुवि

भासमानम्।।८।।

द्वादशात्मा रविश्चार्कः कालचक्रप्रवर्तकः।

सप्तसप्ति-रथस्थोऽयं मार्तण्डस्तपताम्पतिः।।९।।

वृष्टिकर्ता बृहद्रूपो भ्राजिष्णुर्भुवनेश्वरः।

जयप्रदो जगत्साक्षी जयतात् सर्वमङ्गलः।।१०।।

स्तोत्रेणानेन यः स्तौति सूर्यनारायणं प्रभुम्।

तस्यारोग्यञ्च सौभाग्यं जायते वर्धते सदा।।११।।

'श्रीसूर्यनारायणार्पणमस्तु'

**पूर्वप्राध्यापकः**

**छापर (चूरू)**

**मो. 9351226660**

# क्षमया किं न सिध्यति

❑ डॉ. योगिनी एच. व्यास

गुर्जरराज्यस्य सौराष्ट्रजनपदे एकं ग्रामम् अस्ति। तस्मिन् ग्रामे वर्षत्रयपर्यन्तं वृष्टिः न अभवत्। गृहस्थाः गृहिण्यः, वृद्धाः, युवकाः, युवत्यः, शिशवः, पशु-पक्षिणः सर्वे आपत्तिग्रस्ताः अभवन्। अस्मिन् ग्रामे किशन नामा एकः युवकः स्वभार्यया पुत्रेण च सह निवसति स्म। सः प्रतिदिनं अन्वभवत् यत्-

**नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः।**
**नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः।।**

निराश्रयत्वेन तेन स्तेनकार्यम् आरब्धम्। स्वग्रामात् निर्गत्य प्रतिदिनं समीपवर्तिग्रामेषु स्तैन्यम् अकरोत्। एकस्मिन् दिने सः निकटस्थग्रामं गच्छति स्म तदानीं सहसा वर्षायाः आगमनं जातम्। कतिपयानां संवत्सराणां पश्चात् महती वृष्टिः अभवत्। सः चिन्तातुरमनसा अचिन्तयत् 'अहो! एतस्यां वर्षायां रक्षणार्थं कुत्र गमिष्यामि?' तदानीं दूराद् एकं शिवालयम् अपश्यत्। सः अचिन्तयत्-साधु! अस्मिन् शिवालये आश्रयं याचयिष्यामि।

सः मन्दिरस्य अभ्यन्तरभागे प्राविशत्। तत्र सः क्रियाविधिरां अपश्यत्। फूलशङ्करनामपुरोहितः व्रतोपवासविधि-प्राणप्रतिष्ठाविधि-वास्तुपूजनविधि-मण्डपपूजनविधि-यज्ञविध्यादीनां धार्मिककार्याणां ज्ञाता आसीत्। अपि च सः प्रियङ्करः, उपकारपरः, कृपालुः, अनुकम्पकः च आसीत्। फूलशङ्करः किशनं दृष्ट्वा एव स्नेहपूर्वकम् अकथयत्- 'भो महाशय! गर्भगृहम् आगच्छ। त्वं चिरक्लेदितोऽसि व्याधियुक्तः भविष्यसि।' सः किशनाय गात्रमार्जनवस्त्रं दत्वा अकथयत्- 'शीघ्रं शरीरशोधनं कुरु, अपराणि वस्त्राणि धारय।' तदनन्तरं पुरोहितेण तस्मै भोजनं दत्तम्। अनवरतवृष्टेः कारणात् किशनः मन्दिरे एव अस्वपत्। मध्यरात्रौ सः अचिन्तयत्- प्रभातकाले रिक्तहस्तेन कथं गृहं प्रति गमिष्यामि? सः उत्थाय इतस्ततः अन्विषत्। मन्दिरस्य भाण्डागारे रजतमतनिर्मितानि बहुमूल्यानि पात्राणि आसन्। सः अविलम्बेन सर्वाणि पात्राणि शाणपुटे निधाय मन्दिरात् स्वग्रामं गन्तुं सज्जीभूतः। सः अचिन्तयत्- पुरोहितमहाशयः गाढनिद्रायां स्वपिति। वृष्टि अपि स्थगिता अस्ति। तर्हि यावत् शीघ्रं इतः पलायनं कृत्वा निर्गच्छामि।

यावत् सः शाणपुटकेन सह गच्छति स्म, तावदेव एकः नगररक्षकः तं दृष्टवान्। नगररक्षकेण चिन्तितम् - अयं तु स्तेनः इव प्रतिभाति। सः उच्चस्वरेण तम् अकथयत्- 'तिष्ठ! अतिप्रभाते (मध्यरात्रौ वा) शाणपुटं गृहीत्वा कुत्र गच्छसि?' सः अवदत्- 'अहम् अन्यग्रामात् अत्र आगच्छामि।' तर्हि शाणपुटं अनावृत्य दर्शय।'महाशय! गृहोपयोगाय मूल्यं दत्त्वा मया पात्राणि क्रीतानि।' नगररक्षकः अवदत्- 'यदि एवं तर्हि दर्शय शीघ्रम्।' सः शाणपुटम् उद्घाट्य अवदत्- 'अहो! इमानि रजतमयानि पात्राणि तु देवपूजार्थम् उपयुक्तानि सन्ति यदि एवं तर्हि मन्दिरं गत्वा पुरोहितं पृच्छावः।' नगररक्षकः स्तेनं गृहीत्वा पुरोहितसमीपम् आगतः।'हे साधो! अयं स्तेनः भवतः मन्दिरस्य रजतमयानि पात्राणि चोरयित्वा पलायति स्म।' पुरोहितः प्रत्यवदत्- 'आश्चर्यमिदमस्ति। मन्दिरात् न किञ्चिदपि चोरितमस्ति।''पश्य एतानि रजतमयानि पात्राणि।' नगररक्षकः अवदत्।

किञ्चित् विचार्य पुरोहितः अकथयत्- 'सत्यम्! इमानि पात्राणि मन्दिरस्य देवपूजोपयुक्तानि सन्ति। किन्तु तानि किशनेन न चोरितानि। आपद्ग्रस्तं तं विलोक्य मया एव दत्तानि सन्ति।' नगररक्षकः अकथयत्- 'यदि एवम् अस्ति तर्हि तस्य निग्रहणम् अनुचितमस्ति।' सः मन्दिरात् निरगच्छत्। नगररक्षके गते, स्तेनः पुरोहितस्य चरणयोः पतित्वा क्षमाम् अयाचत्। पुरोहितः अवदत्- 'पश्य! अद्य तु त्वं मया रक्षितः। किन्तु यदि त्वं तव परिवारस्य हितम् इच्छसि, तर्हि वचनं देहि यत् अद्यप्रभृति कदापि स्तैन्यं न करिष्यसि।' किशनः गद्गदेन स्वरेण अकथयत्- 'भो पूज्य! भवान् तु मह्यम् देवसदृशः अस्ति। इदानीं प्रभृति अहं कदापि मम जीवने स्तैन्यं न करिष्यामि। परिश्रमेण एव मम परिवारस्य कृते आजीविकां प्राप्स्यामि।'

अनया लघुकथया बोधः प्राप्यते यत्-

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत्।**
**एवं पुरुषकारेण विना दैवं न सिध्यति।।**

अपि च -

**अयं मे भगवान् हस्तोऽयञ्च मे भगवत्तरः।**
**अयं मे विश्वभैषज्यमयं शिवाभिमर्शनः।।**

- कोट-१४३५/सी १, सेक्टर- २बी,
गांधीनगरम्, गुजरातराज्यम्

# ऋतुकाव्यम्

## [ ग्रीष्मखण्डम् ]

❑ कविरश्मि- श्रीव्रजकिशोरत्रिपाठी

( १ )

श्रीसूर्य: सकलेश्वरो दिनकरश्चन्द्रस्तदंशोज्ज्वल:
सर्वर्तुर्भुवि जायते तदयनात्तेषां परीवर्त्तनम्।
भूतेशो भुवनाधिपो ग्रहपतिर्लौकैकनाथो विभु-
र्विश्वारोग्यकरो महाद्युतिधर: पायादपायाज्जगत्॥

( २ )

चैत्रान्ते मलयप्रवाहसमये ग्रीष्मो महाकर्कश-
स्तत्तप्तांशुचयेन मर्त्यभुवनं प्रायाति दर्पेण स:।
तस्योष्णेन महीतलं विचलितं सर्वे गता: शङ्किता
दुर्वारं बलशालिनं जनगणो दृष्ट्वा पुरस्ताद् यथा॥

( ३ )

उत्तापी पवन: प्रतापिकिरण: कालेश्वर: श्रीरवि-
र्नि:शुष्का धरणी नदी कृशतनु: का वा मरुद्वासिनी।
वृक्षाली मलिना यथा विरहिणी नारी गृहोत्तापिनी
तस्माद्धि पशवस्तदीयनिकटं यान्ति प्रबोधाय किम्॥

( ४ )

निर्दीर्णा वसुधा तृणादिरहिता खल्वाटनारी समा
सा कस्मिन् कृषकै: सुशस्यभरिता कूपोदकेन क्व वा
खाद्याभावविबाधितास्तृणभुजो गावादयो दुर्बला
दूरूपा प्रकृतिर्यथा गतपति: सीमन्तिनी दृश्यते॥

( ५ )

निर्वायौ दिवसे प्रचण्डसमये स्वेदाढ्यलोको मुहु-
र्ग्रीष्माभीतमनास्तथापि चलति स्वक्षेत्रकर्म प्रति।
उष्णीषं निजमस्तके विलसति प्रोष्णाय किञ्चित् क्षणं
हे वर्षातरुणीमणे! तव दया नो वा कथं जायते॥

( ६ )

ग्रीष्मोत्तापभयं तदंशुजनितं घातं च घर्मादिकं
नादृत्य श्रमिकास्तथा च कृषका गच्छन्ति क्षेत्रादिकम्।
सानन्दं कृषिकर्मधर्मनिरता: शस्यादिसंवृद्धये
सर्वे चेन्निजकार्यसाधनपरा देशे सुखं नर्तिता:॥

( ७ )

छात्रा वै गृहदूरदर्शनपटं पश्यन्ति जालं मुहु:
कस्मिन् वा भविता प्रकाशसमय: किं मे परीक्षाफलम्।
एवं भावविलोडिता निजकृतिं नृत्यन्ति दृष्ट्वा भृशं
यो यस्मिन् श्रमिकस्तदीयसुफलं प्राप्नोति नूनं क्षितौ॥

( ८ )

छात्रा मन्दफला विरागहृदया: पित्रादिभिर्दु:खिता:
प्राप्ता ये सुफलं विचिन्तितहृद: किं वा पठिष्याम्यहम्।
पित्रोर्भिन्नमतं गुरोश्च विमतं मित्रस्य भिन्नं मतं
स्वस्याप्यन्यमतं ततो निजगृहे द्वन्द्वायते किं न वा॥

( ९ )

लोकास्यं च विकर्त्तनो विकृतहृद् ग्रीष्मप्रवाहैर्ध्रुवं
तेज:कर्त्तरिकाबलात् प्रकुरुते क्रोधात् स किं कर्त्तनम्।
प्रातर्वर्त्तुलतां प्रशान्तविषयं त्यक्त्वा कथं क्रूरतां
स्वीकृत्य प्रहिणस्ति दानवसम: क्रन्दन्ति सर्वे भृशम्॥

( १० )

वायुर्वह्निसम: कदा वहति वै वात्या कराली कदा
धूलीयुक्तसमीरण: प्रलयकृद् भीतिप्रदो वा कदा।
वैशाखीति कदा महाभयकरी चायाति मेघेन सा
भूय: शीतलमन्दमारुतवरो लोकोपकारी कदा॥

( ११ )

तापाद्भीतजनाः कदा जनपदे दुर्घूर्णिवात्याबलात्
क्षेत्रं नष्टगतं गृहादिपतितं क्रन्दन्ति दृष्ट्वा मुहुः।
दुःखस्योपरि दुःखभारमनिशं किं वा करिष्याम्यहं
हा दैवं मम जीवनं नयति नो नानाभयापीडितम्॥

( १२ )

मध्याह्ने खररश्मिरश्मिपतनाद् वह्निप्रभा धूलयो
मार्गे नो पथिकः क्षमः प्रचलितुं युक्तोपि पादावृतैः।
छात्रा नूतनकौशलेन वदनं चाच्छाद्य यान्ति द्रुतं
किं वातङ्ककरा भ्रमन्ति मनसि प्रायाति शङ्का तदा॥

( १३ )

सूर्यः क्रोधमुखोऽथवा प्रलयकृत्तापोऽधुना जायते
वह्निर्वर्षति वा प्रचण्डकिरणैर्न प्रत्ययो मानसे।
किं वा द्वादशविग्रहैः प्रतपते सौन्दर्यपूर्णां धरां
दृष्ट्वा तप्तगुणं जना विमुखिनः पश्यन्ति मेघं मुहुः।।

( १४ )

आच्छाद्याननहस्तयुग्मसहितं मुण्डं पिधायांशुकै-
रारोह्यापि नवीनयानमतुलं गच्छन्ति निःशङ्कया।
चक्षुस्त्राणपिधायिका युवतयः स्वीयं कुटुम्बं गुरून्
मान्यान् वा न च मानयन्ति नितरां दुःखं लभन्ते ध्रुवम् ॥

( १५ )

सर्वं तप्तकटाहभावभरितं द्रव्यं च पात्रादिकं
पर्यङ्कं वसनं गृहं गृहतलं कुड्यं ज्वरापीडितम्।
स्नानं तप्तजलेन लोकविमुखा चुल्लीप्रतप्तं नु किं
तस्माद् ग्राम्यजनाः प्रभातसमये गच्छन्ति खातादिकम्॥

( १६ )

स्नानार्थं ससुखं विधाय रुचिरं कुण्डं स्ववासान्तिके
केचिद् वासगृहान्तरे निजधिया केचित् स्वसौधोपरि।
ग्रीष्मोत्तापविनाशनाय नितरां भोगार्थिनः स्नान्ति ते
नद्यादिं प्रचलन्ति निःस्वमनुजास्तेषां सहायो न कः॥

( १७ )

ग्रीष्मर्तौ जलकष्टनाशविषये कृत्वा धुनौ कूपकं
स्वच्छाम्भोग्रहणाय हृष्टहृदयस्तत्तीरवासी जनः।
धन्यो यस्य नदीतटे जनपदं पूतं जलं सेवते
कूलेऽतो नगरं तथा जनपदं विश्वे ततो भासते॥

( १८ )

सायंकालसमागतेन मनुजा गच्छन्ति तस्यास्तटं
सेवन्ते बहुकोमलं सुपवनं ते भाग्यवन्तो जनाः।
नानामोदविमोहिताश्च सकला यावत् प्रदोषं भवेत्
स्नानादिं च विधाय हृष्टमनसाऽऽगच्छन्ति ते स्वालयम्॥

( १९ )

आरामेषु विराजते हृदयहृद् दिव्यप्रभं पाटलं
सन्ध्यातः परिदृश्यते प्रतिदले मल्लिर्मनोहारिणी।
हट्टे तत्सुरभिं विलोक्य जनता क्रीणाति नेतुं गृहं
देवान् पूजयति प्रपाणकजले संस्थाप्य संरक्षति॥

( २० )

प्रातःकालमनोहरं दिशि दिशि ह्लादो वरीवृध्यते
वृक्षाली व्रतती स्वयं कुसुमिता मोदेनुषा वन्दते।
काकाः काकलिभिस्तदीयसुतनौ राजन्ति मालासमा
यावत्तप्तकरो न भाति भुवने सर्वत्र तावत्सुखम्॥

( २१ )

देवाशीर्जनतासुखाय सततं शास्त्रे प्रसिद्धिर्यतः
संक्रान्तिर्विषुवाख्यकाऽद्य समये ख्याता तृतीयाऽक्षया।
सावित्री सधवात्मिका शिवशिवायात्रा च संपाल्यते
सूर्याशौर्यभयं निरस्य नितरां मज्जन्ति ते पर्वसु॥

( २२ )

कालेऽस्मिन् स्वदते प्रपाणकमहो स्वादिष्ठतक्रादिकं
शैत्याम्भः कदलीसुखण्डसहितं लोकस्य तृप्तिप्रदम्।
तस्मात्तद् ददते जनाः पथचरेभ्यो धर्मकामा मुदा
नो चेद् धर्मबलं क्षितौ न हि भवेत् सर्वे न वै स्वार्थिनः॥

( २३ )

आम्रं तालफलं सुपक्वपनसं रम्भाफलं कर्कटी
दुर्लक्ष्यं लिचु नारिकेलसुजलं दिव्येक्षुपाकादिकम्।
तक्रं शैत्यजलं दधीक्षुसुरसः किं वामृतं शान्तिदं
लोकाः प्रीततया पिबन्ति नितरां गृह्णन्ति भोक्तुं सदा॥

( २४ )

दध्यन्नं जलपूरितं सलवणं पालाण्डुखण्डैर्युतं
लेम्बुस्वादसमन्वितं रुचिकरं स्वल्पाम्लसंमिश्रितम्।
स्नानं कूपजलेन हैमसलिलं छायां वटस्य द्रुमाद्
भुक्त्वा ग्राम्यजना वसन्ति ससुखं ते स्वास्थ्यवन्तः सदा॥

( २५ )

सन्ध्या प्रीतिविवर्द्धिनी रविमणिः सिन्दूरविन्दूपमो
नानायानजनाः पथां बहुलतां कुर्वन्ति संदृश्यते।
छात्राः कन्दुकयष्टिखेलनिरता धावन्ति गावो गृहं
प्रत्यायान्ति खगाः स्वकीयवसतिं रावन्ति वै जम्बुकाः॥

( २६ )

सर्वेषां च वपुः कृशढ्यसिचयैः संशोभतेऽस्मिन् क्षणे
छात्रा मुक्तकलेवराः सुशिथिलं गृह्णन्ति चार्द्धोरुकम्।
वृद्धाश्चैककृशांशुकेन पिहिता मार्गे व्रजन्त्यत्वरं
घर्मार्त्ता रमणी विकुण्ठितमना नो याति पाकालयम्॥

( २७ )

रात्रिर्वायुविनोदिनी यदि भवेच्छान्तिस्तदा जायते
सा चेद्वायुवियुक्तिका क्षणमपि स्वात्मा वियुक्तायते।
दुर्वारा मशका विदंशनकृते प्रायान्ति तस्मात् कुतः
प्राणा यान्ति सहायको न हि तदा सर्वे यतः पीडिताः॥

( २८ )

तापात्क्षीर्णमना विलासरहितान्निद्राप्रिया चञ्चला
रोषात्सा किमु कस्य नेत्रयुगलं नायाति रात्रौ चिरम्।
यावन्नार्द्धनिशं क्षितौ विहरते नो वाति वायुर्मृदु-
स्तावत् कोमलकामिनीं गुणवतीं धर्तुं न कोऽपि क्षमः।।

( २९ )

विद्युद्वायुबलाद् विमुह्यति कदा क्षुब्धापि तापात् पुनः
शीतस्पर्शवशाद् विमुग्धहृदया नेत्रेऽखिले नृत्यति।
गाढालिङ्गनचुम्बनादिफलतः प्रातर्न वा ज्ञायते
धन्या सा हितसाधनी रसवती तस्या विना धिग् जगत्॥

( ३० )

वित्ताढ्या मृदुशीततापखचितं यन्त्रं गृहाभ्यन्तरे
केचित् शीतलवायुदायकमहो गृह्णन्ति यन्त्रं भयात्।
विद्युन्मारुतदं नियोज्य सदने केचिल्लभन्ते सुखं
कः पत्रव्यजनेन कष्टसमयं दूरीकरोति क्षणम्॥

( ३१ )

विद्युच्छक्तिसहायिका दिननिशं नोचेन्महासङ्कटं
देशक्लेशविनाशने न निपुणा सर्वत्र सा क्षीणभा।
तच्छिन्नापि पुनः पुनर्जनमनो दुःखायते सर्वदा
ग्रीष्माहो नितरां व्यथा जनयति त्रायस्व वर्षेश्वरि!॥

**इति पं. श्रीव्रजकिशोरत्रिपाठि-विरचिते ऋतुकाव्ये ग्रीष्मखण्डं संपूर्णम्**

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ द्वितीयस्सर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

केकानादश्श्रवणमधुरपूश्रूयते गोकुलेऽस्मिन्
नव्यैर्वत्सैस्सह सहचरैर्धेनवस्सञ्चरन्ति।
उच्चैः किञ्चिद् विमलयमुनानीरमादाय शीत-
मन्दम्मन्दन्नवजलधरो वर्षयन् सम्प्रयाति।।१।।

संगुञ्जन्तः कुसुमरसपाःषट्पदाःवल्लरीषु
दृश्यन्तेऽहो सुरभितफलाश्चाम्रवृक्षा विशालाः।
सद्विप्राणां क्वचिदनुपमा श्रूयते वेदवाणी
गोपाः केचिद्दधिघृतधरा यान्ति चायान्ति भूयः।।२।।

गुञ्जन्ति रागनिपुणा खलु गीतकानि
गुञ्जन्ति गायनविदो निपुणं 'तरानाम्'।
मुग्धाः पुनः सरसिजं स्फुटितं समीक्ष्य
गुञ्जन्ति ते मधुलिहो विषयप्रिया ये।।३।।

सघने निकुञ्जरुचिरे यमुनासुतीरे
राधामुकुन्दयुगलच्छविरंजिते च
कश्चित् प्रमत्तपदपद्मपरागलुब्धो
गुञ्जन् विभाति मधुपो मधुलोलुपोऽयम्।।४।।

तत्रैवैकं हरितकदलीपादपैरावृतं तद्
नीलग्रीवप्रचुरचपलैस्सेवितं यन्मयूरैः।
रक्तश्श्वेतैःकमलकुसुमैः पूरितं स्वच्छतोयं
प्रातःप्रातःकुसुमितसरो दृष्टवानुद्धवोऽसौ।।५।।

तस्यासन्नन्नयनमधुरम्माधवीपुष्पपूर्णं
चम्पापुष्पैर्बहुधवलितम्पूर्णचन्द्रस्वरूपम्।
शीतच्छायानवमुकुलितं गोपिकाराध्यमानं
स्निग्धं स्तब्धं सखिपरिवृतं कुञ्जमेकं ददर्श।।६।।

कुञ्जस्यान्तर्मृदुसुललिते पर्णशालानिकुञ्जे
राधासख्यो रुचिरमनसा कृष्णसौन्दर्यचित्ताः।
वार्तालापे गिरिधरवरं संस्मरन्त्यश्च काश्चित्।
लग्नाः काश्चिद्धृर्यविरसतया कृष्णचन्द्रस्य भक्तौ।।७।।

तल्लीनान्याः नटवरवपुःकीर्तने वाद्ययन्त्रैः
प्रीत्यासक्ताःयदुकुलवरप्रेममाधुर्यपृक्ताः।
काश्चित्सख्यस्समधिकतया राधिकाराधनायां
प्राप्तस्नेहा विविधविधिभिर्दत्तचित्तास्समासन्।।८।।

अत्रैवैषा प्रियतममनोहारिणी शान्तचित्ता
श्वेताब्जाभा जलधररुचिप्रेममग्ना किशोरी।
मुग्धा राधा नयनसुखदं गोकुलेन्द्रं किशोरं
मेघश्यामं कमलनयनं संस्मरन्ती वितस्थौ।।९।।

इत्येवन्ताःकमलवदनाःकृष्णसख्यः प्रकामं
बाह्याभ्यन्तर्मनसि सततञ्चिन्तयन्त्यो व्रजेशम्।
रासक्रीडाचिरविरहिणन्देवकीनन्दनन्तं
व्यादृश्यन्त ह्यनिमिषतया ज्ञानपङ्कोद्भवेन।।१०।।

स्मारं स्मारं यदुकुलपतेस्तां तथैतामवस्थां
दर्शं दर्शं प्रियविरहजां सर्वगोपाङ्गनानाम्।
मोहग्रस्ता स्थितिरियमिमां ज्ञानमार्गेण भित्त्वा
वैराग्येण प्रबलतपसा वाथवा नाशयन्ताम्।।११।।

यस्मिन् काले प्रियसखिवरश्चिन्तयन्नेवमासीत्
काले तस्मिन् मधुकरसमूहाक्रमोऽभूदपूर्वः।
तस्माद्भीतस्तदनुपतितश्चोच्चकण्ठादकस्मात्
उच्चैस्तीव्रो हरिरितिरवो ह्युद्धवस्याश्रुतोऽभूत्।।१२।।

श्रावं श्रावन्ध्वनिरमुमहो गोपिकायुद्धवस्य
कोऽयम् ?कोऽयङ्कुतयिति ?महापण्डितःकश्चिदस्ति।
किम् ?किञ्जातम् ?हरिरिति एवं भाषतेऽयं किमर्थम् ?
ता इत्येवं व्रजकुलवधूट्यो ह्यकस्मादवोचुः ।।१३।।

कश्चिद्विप्रःपठितलिखितःपण्डितश्शास्त्रवेत्ता
लब्धज्ञानो नगरवसतिश्शिक्षितो भात्यपूर्वः।
वार्तां दातुं, कथयति च किं ?केनचित् प्रेषितो वा
तस्मात्स्थानात्सरसनिचुलादत्र ह्यायाति सोऽयम्।।१४।।

कस्ते पन्थाः कथय युवक! प्रेषितः केन वा त्वं
पार्श्वेऽस्माकं वद बुधवर! ह्यागतो वा किमर्थम्।।
का ते भ्रान्तिः किमुत पथिक! भ्रान्तमार्गोऽसि वा किम्
इत्यायान्तं मतिधरममुं गोपिकाः पृष्टवत्यः।।१५।।

तन्मे पन्थाः प्रणयमुखरो दर्शितो माधवेन,
नेत्रद्वाराद्धृदयनिकरे भावभूमावशिष्टः।
नास्ति भ्रान्तिर्विपिनविहिता वीथिभीतिस्तथा नो,
स्मारं स्मारं प्रियतमवरं नन्दबालं व्रजामि।।१६।।

प्रायो नित्यं यदुकुलपतिप्रेमपाशेन बद्धाः!
नाहम्भ्रान्तस्सरसिजमुखा भ्रान्तमार्गोऽपि नाहम्।
दिव्यस्वच्छप्रथितमथुराधीशसम्प्रेषितोऽहं
वेदज्ञाता भुवनविदितःकृष्णमित्रोऽस्मि सख्यः!।।१७।।

भो उक्तं किं श्रवणमधुरन्देवकीनन्दनस्य
श्रीकृष्णस्य प्रियसखयिति प्रेमयुक्तस्य तस्य।
किञ्चोक्तं यत्प्रथितमथुरातस्समायातयेषः
का ते संज्ञा वद युवक! को हेतुरत्रागतस्य।।१८।।

रम्यम्मह्यं करविलिखितम्पत्रमेकम्प्रदाय
कृष्णेनाहम्परमसुखदं गोकुलम्प्रेषितोऽस्मि।
सन्देशम्मे नयतु कुशलञ्चेत्यवादीद्धि कृष्णः
कृष्णस्याहम्प्रियतमसखो ह्युद्धवः प्रब्रवीमि।।१९।।

श्रुत्वैवन्ताम्परिचयमयीं वाचमानन्दपृक्तां
निश्चित्येदं वदति यदयं सत्यमेव प्रभूतम्।
निन्युस्तन्ताः प्रियमभिनवं यत्र राधा प्रियासीत्
कुञ्जस्यान्तःपुनरनुपमं कृष्णमेव स्मरन्ती।।२०।।

श्यामामूचुस्सखिपरिवृताङ्गोपिकाःकृष्णवार्ता
नीत्वा दूतो यदुकुलमणेरुद्धवाख्यःकुलीनः।
बार्हस्पत्यो यदुपतिसमःपीतवस्त्रावृतोऽयं
शास्त्रज्ञश्च व्रजपतिसखो ह्यागतो वृष्णिवंशी।।२१।।

आश्चर्येण प्रचलितधियो व्याकुलावस्थया वा
लोकाचारं कमपि सहसा नाचरन्त्यः कुमार्यः।
औत्सुक्यात्ताश्चिरविरहतस्सुस्थितास्संलपन्त्यः
स्वस्थानेषु ह्यविचलतया तं समावृत्य दूतम्।।२२।।

दृष्ट्वैवैनन्नयनशुभगङ्कृष्णदूतम्मनोज्ञं
श्रीकृष्णस्य व्रजविरहिणश्चित्तचौरस्य तस्य।
कस्सन्देशःप्रिय !मम कृते सर्वसख्यस्सहैव
पप्रच्छुस्ताःविलसितमुखाश्चोद्धव !ब्रूहि सत्यम्।।२३।।

सायम्प्रातःदिनमनुदिनम्प्रेमपाशे प्रबद्धाः!
नूनन्नित्यप्रशमितसुखस्नेहरागे विलीनाः!
ध्यायं ध्यायं हरिपदमहो क्षीणकायाश्च भूयः
सर्वास्सख्यः! शृणुत कथनं देवकीनन्दनस्य।।२४।।

वृन्दारण्यं परमसुखदं सेवितं गोपवृन्दैः
दिव्यम्भव्यं सरसयमुनातीरपारस्थरम्यम्।
श्रीकृष्णेन प्रतिदिनमिदङ्गोकुलं स्मर्यते वः
सत्यम्प्राह प्रखरमतिमान् धैर्यवानुद्धवोऽसौ।।२५।।

गोपीदुःखप्रशमनकरं ह्युद्धवेन प्रशस्तं
साक्षात्प्राप्यावसरमचिरं कृष्णचन्द्रस्य रम्यम्।
पत्राचारं करविलिखितम्प्रापितं गोपिकाना
मानीतन्तत्सरसिजकरेष्वच्छहस्तेषु तासाम्।।२६।।

दिव्यम्पत्रं हरिविलिखितम्प्राप्य गोपाङ्गनास्ताः
स्नेहाधिक्यान्निजकरबलात् स्वेच्छयाकर्षयन्त्यः।
भित्त्वाच्छित्त्वा ह्युरसि च कपोलेषु संस्पर्शयन्त्यः
स्मारं स्मारं रमणमधुरं कृष्णचन्द्रं ह्यनृत्यन्।।२७।।

श्रावंश्रावं श्रवणमधुरङ्गोपिकाह्लादगानं
दर्शन्दर्शन्नयनमधुरं कृष्णभक्तिस्वरूपम्।
पायम्पायं सरसरुचिरं रूपमाधुर्यतोयम्
स्पार्शस्पार्शं स्पर्शसुखवहं कृष्णभक्तेस्समीरम्।।२८।।

गोप्यानन्दं हृदयजनितङ्गोकुलेशस्य भक्तौ
द्वैताद्वैतस्फुटितहृदयो माथुरश्श्रेष्ठदूतः।
तत्र स्थित्वामरपुरसुखङ्गोपिकाभक्तिभावं
भावम्भावम्मनसि चरमम्मन्त्रमुग्धो बभूव।।२९।।

राधे!कृष्ण!ध्वनिमिति लताःपादपास्सारयन्तः
राधे!राधे!मुखरितरवान्नादयन्तो मयूराः।
गुञ्जन्तोऽहो चपलमधुपाःकृष्णकृष्णेतिशब्दान्
सन्दृश्यन्ते प्रकृतिमधुराःकोकिलाःकूजयन्त्यः।।३०।।

तत्राकस्मादुपरि नभसि श्याममेघस्य दृश्यं
लोकंल्लोकञ्जललवमुचो दर्शनीयम्प्रकामम्।
नीलाभस्य व्रजपतिकिशोरस्य कृष्णस्य मित्रं
नृत्यन्तन्तङ्गिरिधरवरङ्कृष्णगोपन्ददर्श।।३१।।

गायन्त्यस्ता गिरिधरयशः कुञ्जकेलिं स्मरन्त्यः
रासक्रीडापरिमितसुखम्मानसे भावयन्त्यः।
गोप्यस्सर्वास्सरलहृदयाःकंसचाणूरशत्रोः
स्तब्धन्दूतञ्चकितहृदयं ह्युद्धवञ्चैवमूचुः।।३२।।

किन्ते मित्रं स्मरति सरलान् विस्मृतो वा व्रजस्थान्
सर्वानस्मान् सुजलयमुनातीरगोगोपवृन्दान्।
गोपेशस्य ध्वनितमुरलीधारिणः पूतनारेः
वार्तामस्मान् कथय मथुराधीशकृष्णस्य तस्य।।३३।।

हत्वा कंसं व्रजजनरिपुम्मारयित्वा च शत्रून्
कृत्वा राज्यञ्जननिजनकम्मोचयित्वा स्वहेतुम्।
रामं रामं वद मधुपुरीं सेवते ते किमर्थं
सोऽह्यं कृष्णो नदति न कथं गोकुलम्प्रेत्य वंशीम्।।३४।।

किम्वा कृष्णन्नगरवनितास्सञ्जिता राजधान्यां
दर्शन्दर्शं यदुकुलवरम्मोहयन्ति प्रभूतम्।
किम्वा रम्यान्तव मधुपुरीम्प्राप्य कृष्णोह्यस्मदीयः
प्रासादे सुस्थितनववधूनेत्रदृष्ट्याहतोऽस्ति।।३५।।

तास्वेकैवं वदति रुदती प्राप्तकृष्णाङ्गसङ्गा
बाल्यञ्चौल्यञ्चपलनयने माधवस्य स्मरन्ती।
अन्या काचिद्ध्यधरसुधयाप्लावितं कृष्णचन्द्रं
स्मृत्वा स्तैन्यम्परममृदुलंल्लज्जया पाययन्ती।।३६।।

एकीभावं कुचविलुलितं गोपिकाकृष्णयोस्तत्
प्राप्याद्वैतं रतिविषयकम्मिश्रितम्प्रेमरूपम्।
तत्तादात्म्यम्परपरतरम्प्रेमिणोरद्वितीयं
साक्षात्कृत्य व्रजपतिसखःप्रेमशिक्षामवाप।।३७।।

स्थित्यामस्याम्पथिषु विचरन् पद्मरागप्रलिप्सुः
लीलाकृष्णप्रतिनिधिरयम्पादपद्मेषु भिन्भिन्
शब्दान् कुर्वन्ननु निपतितः प्रेत्य तासां सखीनां
दूतःकृष्णभ्रमररसिकःप्रार्थयामास गोपीः।।३८।।

प्रोचुर्गोप्य:कितव ! मधुप ! श्मश्रुभिर्मास्पृशाङ्घ्रिं
व्यर्थम्मिथ्यानमनवचसा प्रार्थनाम्मा विधेहि।
कृष्णस्सर्वान् छलयति यथा त्वं छली तद्वदेव
कृष्णस्स्वामी तव मधुकर ! त्वन्तथैवासि कृष्ण: ।।३९।।

बाल्यादेव द्विहृदयिसखं राधिकाचित्तचौरं
जानीमस्तञ्चिरपरिचितास्स्मो वयं स्वामिनस्ते।
गुञ्गुञ्च्छब्दै:कथमिहभवाञ्च्छ्रावयन् कृष्णकीर्तिं
ह्यस्तित्वान्धिकधवलमधुराकामिनीचाटुकार !।।४०।।

गत्वा तत्र प्रियमधुपुरीं ह्युद्धवस्यास्य मित्रं
श्रीकृष्णञ्च प्रियसहचरीं श्रावय स्वस्य गीतम्।
तेनावश्यं सुहृतहृदया ह्युत्तमश्लोकजल्पै:
श्रद्धाभक्त्या परिचरतु तत्पादपद्मेषु पद्मा।।४१।।

भ्रामम्भ्राम्प्रतिसरसिजन्त्वम्पिपासो ! षडङ्घ्रे !
पायम्पायन्नवमधु यथा पूर्णसन्तुष्टचित्त:।
चायञ्चायम्प्रतिगृहमसौ स्वच्छहैयङ्गवीनं
सन्तृप्तस्सन् व्रजभुवि तथा प्राभ्रमद्वासुदेव: ।।४२।।

व्याध:कश्चिद्धरति सरलप्राणिनाम्प्राणराशिं
गोपङ्गोपं कुटिलहृदयस्तं यथा कौलटेर:।
चोरश्चोरम्प्रतिसखिमनश्श्रीमुखभ्रूविलासै:
सत्यम्ब्रूमो मधुकर ! तथा चाहरत् कृष्णचन्द्र:: ।।४३।।

नामन्नामम्मनसि रुचिरं कामदेवस्वरूपं
सर्वा नार्यो भुवि दिवि च यास्सन्ति देवाङ्गनास्ता:।
प्रत्यासन्ने रमणसमये कामयन्ति व्रजेशं
साक्षाल्लक्ष्मीस्स्वयमनुपमा दास्यभावम्प्रयाति।।४४।।

सर्वा नारीर्भुवि दिवि च वा दिव्यदेवाङ्गनास्ता:
गामङ्गामं रमणसमये तोषयेत व्रजेश:।
साक्षाल्लक्ष्मीं स्वयमनुपमां याति चेद्यातु कामं
जानीमस्तं वयमिह महाचित्तचौरं षडङ्घ्रे !।।४५।।

श्रावं श्रावं मधुरमधुरं वंशिकाशब्दरागं
स्पर्शं स्पर्शं मृदुलमृदुलं पंकजश्यामदेहम्।
सर्वा:गोपीस्समविचदसौ हा मनोमोहनोऽस्मान्
तस्य स्मृत्यां विचितहृदया याम कुर्याम किं ? क्व ?।।४६।।

गत्वा कृष्णं वदतु मधुप ! प्रेमिणम्माधवं तं
कृत्वा स्नेहम्प्रणयिवचनम्प्रोच्य कुत्र प्रयात: ?
सस्नेहस्ते प्रियतम ! सखे ! प्राप्स्यते क्वाधुनास्मान्
किं सोऽस्माकं यदुकुलशशी विस्मृत: प्रेमभावम् ।।४७।।

उक्त्वास्माकं विरहजनितां स्वामिनं स्वस्य वार्तां
प्रत्यावृत्त: प्रियसख ! पुनर्माधवप्रेषित:किम् ?
शीघ्रं शीघ्रं वद किमनुरुन्द्धे प्रियो वासुदेव:
सत्यं सत्यं वद मधुपुरींनेष्यसि त्वं किमस्मान्।।४८।।

आमाम्, सख्यश्शृणुत चलत श्रेयसा त्वत्प्रियेण
नेतुं युष्मान् व्यथितहृदया: प्रेषितोऽहम्पुनश्च।
पार्श्वे तस्य प्रियमधुकर ! त्वम्प्रयाहि त्वरायां
यास्यामो नो सततमुरसि श्रीर्वधूस्साकमास्ते।।४९।।

भालं कृष्णं ह्यपसरतु ते पादपद्मेभ्ययेतं
नो श्रोष्यामो विनयमधुना ते वयं हे षडङ्घ्रे !
लक्ष्मीभोगाच्युतकुवलियापीडहस्तिप्रहर्तु:
जानीमस्त्वान्त्वमसि च महाञ्च्छिक्षितश्चाटुकार:।।५०।।

गत्वा कृष्णप्रियमधुपुरीञ्चाटुकारप्रयासै:
तासाम्पादान् कमलसदृशान् प्राप्य सेवस्व भूय:।
तोषं तोषं हृतकुचरुजा माधुरीर्माथुरीस्ता:
दास्यन्त्यच्छं युवमधुप ! तुभ्यम्पुरस्काररराशिम्।।५१।।

ग्रीष्माकीणा यदि नहि रुचिर्वर्तते कृष्णचन्द्रे
सख्यस्तर्हि प्रतिदिनमिदं रोदनं वः किमर्थम्।
वृन्दारण्यं त्यज पतिगृहं याहि सेवस्व भोगान्
को लाभस्ते कठिनतपसा निर्जनेऽस्मिन् वने हि।।५२।।

भोजम्भोजम्भ्रमर! विषयांल्लौकिकान्ताननित्यान्
को वा तृप्तस्समभवदिमान् यः प्रशंसेदवश्यम्।
त्यक्त्वा भोगान् मधुप! रमतां कृष्णचन्द्रस्य भक्तौ
ध्यायं ध्यायं विचर मधुरान् कृष्णपादारविन्दान्।।५३।।

कृष्णोऽस्माकं रमणविषयो जीवनं कृष्ण एव
कृष्णं त्यक्त्वा कथमपि वयं स्थातुमेवासमर्थाः।
जानासि त्वं भ्रमर! नहि तत् कृष्णप्रेमस्वरूपं
कृष्णस्नेहो हृदयपटले सर्वदा सुस्थितो नः।।५४।।

यस्य स्नेहो भवति हृदये देवकीनन्दनस्य
यो वा प्रेमी परमरसिको वासुदेवस्य तस्य।
योगक्षेमं वहति च सदा सर्वतः पालयित्वा
श्रीकृष्णोऽसौ मनसि रमते नैव दूरम्प्रयाति।।५५।।

सर्वान्धर्मांस्त्यजतु जगतो भौतिकांस्ताननन्तान्
श्रीकृष्णन्तं व्रज शरणदं वेदमन्त्रैरुपास्यम्।
स श्रीशस्त्वाम्परमकृपया सर्वपापेभ्ययेव
हृत्वा शोकन्तव यदुपतिर्मोक्षयिष्यत्यवश्यम्।।५६।।

नामत्रामम्परमरुचिरं राधिकाकृष्णरूपं
वृन्दारण्यं सुखमयममुम्प्राप्य रासस्थलन्नः।
निर्विघ्नान्ताम्मधुप! सुखदां सर्वभावेन नित्यं
निष्पापस्संश्चरतु सततं वासुदेवस्य भक्तिम्।।५७।।

इत्येवं तच्चतुरमधुपो भक्तिदीक्षामवाप्य
भग्नाज्ञानस्सहृदयिमनः कृष्णभक्तश्च भूत्वा
राधाकान्तं नटवरवपुः संस्मरन् कृष्णचन्द्रं
वृन्दारण्ये विमलयमुनातीरकुञ्जेषु रेमे।।५८।।

**********

**इति गोपाङ्गनावैभवम्महाकाव्यस्य द्वितीयस्सर्गः।**

**सह-आचार्यः**
**संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्**
**जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67**

## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

भारती पत्रिका का वार्षिक शुल्क रुपये 150/–, पंचवर्षीय शुल्क 700/–, आजीवन सदस्यता (15 वर्ष) शुल्क 2100/– मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई–मेल से या डाक द्वारा भिजवा देवें।

खाते का नाम – **भारतीयसंस्कृतप्रचारसंस्थान**
खाता संख्या – **2139101912498**
**IFS Code - CNRB0002139**

# अध्यापकछात्राणां व्यक्तित्वे ऑनलाइनशिक्षायाः आभासीयशिक्षायाः प्रभावः

❑ डॉ. सुन्दरलालशास्त्री

शिक्षा व्यक्तेः जीवनस्य महत्त्वपूर्णम् अङ्गं विद्यते। शिक्षाशब्दः संस्कृतव्याकरणे 'शिक्ष'धातोः प्रादुर्भूतः। यस्य अर्थो भवति अध्ययनं अध्यापनञ्चेति। शिक्षां विभिन्नमाध्यमैः वयं ग्रहीतुं शक्नुमः। शिक्षया एव मनुष्यः बौद्धिरूपेण परिपक्वः भवति। परिवर्त्यमाने जगति आभासीयं शिक्षणं शिक्षायाः प्रमुखं द्वारं जातमस्ति। कोविड-19 इत्यस्मिन् काले शिक्षकछात्रयोः कृते इदम् अतीव सुष्ठुतरं वर्तते।

यतोहि वैश्विकसङ्क्रमणकारणात् द्वाभ्यां वर्षाभ्यां शैक्षिकजगति नैकानि परिवर्तनानि पुरः समागतानि।

यत्र विद्यालयविश्वविद्यालयानां विधाने आभासीयशिक्षणस्य प्रयोगः कृतः। अयं प्रयोगः अत्यन्तं लाभास्पद आसीत्। यतोहि आवश्यकता आविष्कारस्य जननी उच्यते। यस्य आवश्यकता मानवेन अनुभूयते तस्यान्वेषणे स नूनमेव प्रयतते।

आभासीयशिक्षणस्य इमामेव पराकाष्ठामनुभवन् विश्वविद्यालयानुदानेन देशस्य विश्वविद्यालया आभासीयशिक्षणाय आदिष्टाः।

अधुनैव विश्वविद्यालयानुदानेन स्वीये वक्तव्ये कथितं यत् छात्राः प्रमाणपत्राधारिताध्यनेन सह नियमिताध्ययनं कर्तुं शक्ष्यन्ति।

परिवर्तनशीलसमाजमवलोक्य इदमेव ज्ञायते यदस्य शिक्षणस्य आवश्यकता महती वर्तते।

आभासीयशिक्षणेन सह पाठ्यक्रमाणामध्ययनं तस्य गुणवत्तायाः विषये प्रभूतं बलं प्रदीयते।

अनेन विद्यार्थिनः गृहे स्थित्वा उत्तमां शिक्षां प्राप्नुयुः। अत्र-लेशमात्रमपि संशयो नैव वर्तते यदनेन प्रयासेन संस्थाछात्रयोः विकासः न स्यात्।

यथा वीडियो उद्बोधनेन एकबारमेव बहूनां छात्राणामध्ययनं कारयितुं शक्यते। साक्षात्शिक्षणे एवं सम्भवं नासीत्। ऑफलाइनवातावरणे छात्राणां स्थानस्य अभावो भवति स्म। आभासीयशिक्षणं धनसंसाधनानां समस्याऽपि दूरं गता भवति। संस्थाः संरक्षितेन धनेन विभिन्नानि कार्याणि सम्पादयितुं शक्नुवन्ति। इमानि एव कारणानि सन्ति आभासीयशिक्षणस्य। अस्य अनेके लाभाः प्रतीयन्ते।

- शिक्षणानुगुणम् आवश्यकतानुसारम् अद्यापि उच्चतमगुणवत्तायुक्तविद्यालयानां विश्वविद्यालया-नामभावः दरीदृश्यते।

अस्यां स्थितौ केचन महाविद्यालयाः सन्ति यत्र छात्राणाम् अधिका प्रतिस्पर्धा भवति।

येषां छात्राणां प्रवेशः ईदृशे विद्यालये भवति। यत्र तेषां शुल्कदाने महत्कष्टम् अनुभूयते।आहत्य एवं वक्तुं शक्यते यत् आभासीयशिक्षणेन शिक्षणोपरि न्यूनो व्ययः भवति।

- **विकल्पबाहुल्यम्** - आभासीयशिक्षणे छात्रेभ्यः अनेकप्रकारकाणाम् आभासीयः पाठ्यक्रमः प्राप्यते। अत्र छात्राः स्वरुच्यानुगुणं पाठ्यक्रमस्य चयनं कर्तुं शक्नुवन्ति।

अनाभासीयशिक्षणे एवं सुविधा नैव भवति।

– उद्योगेन सह आभासीयशिक्षणस्य अयमपि लाभः वर्तते यत् उद्योगं कुर्वन् अपि अध्ययनम् कर्तुं शक्यते। नियमितरूपेण संस्थानेषु गमनं नैव आवश्यकं भवति। अतएव अयमत्यन्तं लाभप्रदोऽस्ति।

– **आभासीयशिक्षणेन समयस्यापि सदुपयोगः** अवश्यमेव भवति। यतो हि वयमनेन कुटुम्बस्य पालनं कुर्वन्तः आभासीयपाठ्क्रमेण अध्ययनं कारयितुं शक्यते।

एतदर्थं छात्रैः महाविद्यालये उपस्थितिः अनिवार्या नैव भवति। यतः गमनागमनकालः संरक्षितो भवति। भौतिकजीवने मानवस्य समीपे समयस्य अभावो वर्तते। किञ्च आभासीयशिक्षणे इदम्खर्वमपि सम्भाव्यते।

– **अधिगमस्य जागरूकता तथा उत्सुकतायां वृद्धि :** आभासीयशिक्षणे विद्यार्थिनः अधिकाधिकं ज्ञातुं प्रयतन्ते। यथा- नृत्यम्, सङ्गीतम्, उच्चारणम्, चित्राङ्कनम् इत्यनेन सहैव छात्रेषु अधिगमस्य उत्सुकता प्रबला जाता।

यथा नाणकस्य पक्षद्वयं भवति तथैव अस्य शिक्षणस्यापि पक्षद्वयं वर्तते।लाभः हानिश्च।

प्रायः द्वाभ्यां वर्षाभ्याम् अध्ययनम् अध्यापनं कारयन्तः शिक्षकाः छात्राः मानसिकशारीरिकरोगैः पीडिताः भवितुं शक्नुवन्ति। यतोहि अस्य विभिन्नानि कारणानि भवितुं शक्नुवन्ति। छात्राः यदि नियमितरूपेण अधीयते तर्हि महती समस्या भवितुमर्हति यथा- दृष्टिदोषः मानसिकी पीडा इत्यादि अनेन मानवस्य छात्रस्य च व्यक्तित्वे महान् प्रभावः दृश्यते। कतिचन उपायैः अयं प्रभावः न्यूनं कर्तुं शक्यते।

तद्यथा –

आभासीयशिक्षणे पठतः छात्रान् परित्यक्तव्याः कतिचन निमेषाय येन तेषां मानसिकप्रभात्रः शारीरिकपीडा दूरं भवितुं शक्नुयात्। अभिभावकैः अवधेयं यत् छात्राः पठनकाले केवलं पठनमेव कुर्वन्ति अथवा क्रीडां कुर्वन्ति।

यतोहि छात्राणां स्वभावः क्रीडा भवति क्रीडायां ते अधिकम् आनन्दं प्राप्नुवन्ति।

यथा मनुस्मृतौ उक्तमस्ति :-

**यत्कर्म कुर्वतोऽस्य स्यात्परितोषोऽन्तरात्मनः।**
**तत्प्रयत्नेन कुर्वीत विपरीतं तु वर्जयेत्।।**

अतएव छात्रैः आनन्दः स्वाध्याये कर्तव्यः तेषाम् उपरि विशेषेण ध्यानं देयम्।

अनुत्तमविचारेभ्यः दूरीकरणमपि पित्रोः दायित्वं वर्तते।

– अध्ययनकाले विद्यार्थिन : उचितोत्पीठिकायाः चुनावं चयनञ्च कुर्युः यत्र शरीरसंतुलनं सुष्ठुतरं स्यात्।

तस्य औन्नत्यं तावत्स्यान् यत्र शरीरस्य अनुकूलता उत्तमा स्यात्। पिञ्जोपरि हस्तसञ्चालनं समीचीनं भवेत्। शरीरमपि ऋतुः स्यात्।

– सङ्गणकस्य मॉनीटर इत्यस्य प्रकाशस्य विषयेऽपि ध्यानं देयम्। येन बालकबालिकयोः नेत्रयोः उपरि प्रभावः न स्यात्। सुलभतया ते सर्वमपि द्रष्टुं शक्नुयुः। प्रकोष्ठे पर्याप्तः प्रकाशः स्यात् येन नेत्रयोः कष्टं न भवेत्।

– अनवरतं कक्षायां नैव स्थेयं किञ्चिदवकाशः अवश्यमेव स्वीकरणीयः। कक्षायाम् उपविश्य कञ्चित्कालानन्तरम् इतरतः अवश्यमेव द्रष्टव्यं तेन नेत्रे समीचीने भवतः।

इदम् अवश्यमेव अवधेयं यत् सङ्गणकछात्रयोः मध्ये 20 इन्च इत्यस्य दूरी अवश्यं स्यात्।

मानीटर नेत्राभ्यां किञ्चित् दूरम् अवश्यं स्यात्। तेन नेत्रयोः सुखप्रदोऽनुभवो भवति।

- निर्धारितविषयस्य अध्ययनेन सह अन्यगति-विधीनां बालकेभ्यः अवश्यमेव अवसरो: देयः।

- पाठ्यक्रमं ध्यात्वा समयसारिणी तथा निर्मेया यत् छात्राणाम् अधिकः कालः सङ्गणके नष्टः नैव भवतु।

- ईदृशं वातावरणं निर्मेयं येन छात्राः स्वयं तथा विभिन्नप्रकारकाणां क्रीडानां माध्यमेन अधिकाधिकं प्रोत्साहिताः भवेयुः।

**उपसंहार :-**

आभासीयशिक्षणं यद्यपि विकल्पमात्रमस्ति तथापि अस्य सहयोगः उपयोगः परिस्थित्यनुगुणमतीव महत्त्वपूर्णं विद्यते। यतोहि विश्वे विद्यालयीशिक्षा सम्प्रति विभिन्नपरिस्थितीनां दर्शनं कुर्वतो वर्तते।

यद्यपि कोविड 19 सङ्क्रमणात् प्राक् अध्ययनस्य एवंभूता समस्या दृष्टिगोचरीभवति स्म।

यतोहि 15.5 लक्ष्यपरिमिताः विद्यालयाः भौतिकरूपेण विहिताः अभवन्।

अनेन 24.8 कोटिपरिमिताः छात्राः अधिककालाय अध्ययनमार्गान् दूरं गताः।

अजीमप्रेमविश्वविद्यालयस्य एकस्मिन् शोध-संस्थाने प्राप्तं यत् विद्यालयानां पिधानकारणात् प्राथमिकविद्यालयेषु 82 तः 92 प्रतिशतं छात्राणां न्यूनातिन्यूनम् एकं गणितीयभाषाकौशलात् च्युतः अभवन्। इयं स्थितिः आभासीयशिक्षणे बलपूरिका भविष्यति।

अनेन प्रत्येक छात्राणां शिक्षावर्धने सहायता भविष्यति इति। यद्यपि राज्यकेन्द्रसर्वकारेण रेडियोदूरदर्शनकार्यक्रमाणां साक्षात् नियोजनं क्रियमाणमस्ति।

तथा च अत्र निरन्तरतां स्थापयितुं कार्यक्रमाः अपि निर्मीयमाणाः सन्ति।

आभासीयशिक्षणस्य दुर्गुणाः यदि मर्जिताः भवन्ति तर्हि इदं शिक्षणं सफलताक्षेत्रे मीलपाषाणवत् भवितुमर्हति।

**सन्दर्भग्रन्थसूची :-**


1. सिंह शंकर, 2003 सूचना प्रौद्योगिकी और पुस्तकालय नई दिल्ली, एस.एस. प्रकाशन।
2. कांत, अमिताभ, (2021) शिक्षा को चाहिए तकनीकी का सहारा, दैनिक जागरण, 12.7.2021।
3. त्रिपाठी, प्रो. उमाकान्त, (2021) महामारी में भी शिक्षा की जलती रही लौ, दैनिक जागरण, 22.1.2021।
4. एम.एच.आर.डी.वैज्ञानिक तकनीकी शब्दावली आयोग से जर्नल्स ऑफ ज्ञान गरिमा सिन्धु, आर.के.पुरम, नई दिल्ली।
5. मिश्र प्रो. गिरीश्वर, (2021) कोरोना ने बदला शिक्षा देने का तरीका, दैनिक जागरण, 7.7.2021।
6. मनुस्मृतिः।
7. http://cbse academic in web
8. http://www.parbhasakshi.com



**शोधच्छात्रः**

**श्रीलालबहादुरशास्त्रि-राष्ट्रिय-संस्कृत-विश्वविद्यालयः, नई दिल्ली-110016**

**फोन नं. 9991538370**

# छन्दोबद्धगज़लकाव्यस्तबकः

❑ डॉ. हर्षदेवमाधवः

## ( ३ ) शववाहकाः ( अनुष्टुप् )

रिक्तं कृत्वा गृहं सर्वं गच्छन्ति शववाहकाः।
रामनाम्नः कदम्बेन चलन्ति शववाहकाः।।

गृहस्वामी गतो दूरं विहाय धनसम्पदः।
मृत्तिकां तु शरीरस्य वहन्ति शववाहकाः।।

सन्तोषं जीर्णनाशस्य निगूह्य दम्भपूर्वकम्।
प्रदर्श्य बाह्यसन्तापं रुदन्ति शववाहकाः।।

'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।'
न ज्ञात्वा केवलं मिथ्यां वदन्ति शववाहकाः।।

अवतीर्णो भविष्यामि शब्दे-शब्दे पुनः पुनः।
शब्दगर्भेऽक्षरं मां किं दहन्ति शववाहकाः।।

दृष्ट्वा तु नश्वरं विश्वं नष्टं वह्नौ धगद्धगत्।
मूका भूत्वा महामौने मज्जन्ति शववाहकाः।।

ज्ञानाग्नौ भस्मसात् कृत्वा जीविते सर्ववासनाः।
श्मशाने खलु संसारे नृत्यन्ति शववाहकाः।।

## ( ४ ) स्त्रीपुरुषोक्तिगज़लकाव्यम्

( परिवर्तनशीलरदीफ-काफियाप्रयोगः -भुजङ्गप्रयातप्रयोगः )

सृजामो वयं किं लिखन्तः/लिखन्त्यः।
सदा विस्मरामस्स्मरन्तः/स्मरन्त्यः।।

रुदन्तो/रुदत्यः स्मरामः सदैवम्।
गता ये/गता या हसन्तः/हसन्त्यः।।

वदिष्यन्ति शब्दा अपूर्णां कथां नः।
वयं मूकभावा लिखन्तः/लिखन्त्यः।।

गृहं नास्ति, गन्तव्यस्थानं सुदूरे।
स्वयात्रां त्यजामश्चलन्तः/चलन्त्यः।।

छलान्येव धर्मस्य तीर्थेषु दृष्ट्वा।
गता नास्तिकत्वं नमन्तः/नमन्त्यः।।

प्रवत्स्याम एवं कथञ्चिद् विनोक्त्या।
वयं साधयामो वसन्तः/वसन्त्यः।।

स्ववैरेण गात्राणि काष्ठानि कृत्वा।
ज्वलन्त्येव नु ते/ता दहन्तः/दहन्त्यः।।

न पुंस्त्वं न स्त्रीत्वं न हर्षस्स्वजातेः।
वसन्ते न सन्ति श्वसन्तः/श्वसन्त्यः।।

जले सङ्गमः काष्ठयोर्वा वियोगः।
वियुक्ता भवामो मिलन्तः/मिलन्त्यः।।

- ८, राजतिलक बंगलोज़,
ममता हॉस्पिटल के सामने,
आबादनगर बस स्टॉपसमीप, बोपल,
अहमदाबाद-३८००५८
मो. ९४२७६ २४५१६, ७८७४५ ३२२२५

# श्रीमज्जवाहरयशोविजयमहाकाव्ये वृत्तिप्रयोगः

❑ दयाशंकर शर्मा

काव्यरचनायां यथारीतितत्त्वस्य रसादेरुपकारकत्वं तथैव काव्यवृत्तीनामपि परम्परयोपकारकत्वमभिमतम् अस्ति। इमाः काव्यवृत्तयः काव्यगुणसन्निधानेन तादूरूप्यं गता एव रसोत्कर्षे योगदायिन्यो भवन्ति। काव्यवृत्तयः पंच अभिमताः सन्ति भद्रा परुषा ललिता प्रौढा कोमला च। भद्रजनप्रयुक्तत्वाद् भद्रा इत्युच्यते। इयमेवोपनागरिकाऽपि कैश्चिद् व्यवह्रियते। ग्राम्यशब्दानां प्रयोगैः सर्वथा शून्या इयं वृत्तिः नगरीयव्यवहारप्रयुक्तानां पदानामेव प्रस्तुतिं विधाय स्वस्वरूपमुपस्थापयति।

एवमेव परुषा नाम द्वितीया वृत्तिः परुषवर्णानां प्रयोगैः सम्भवति। ललितावृत्तिः पदलालित्येन विशिष्टा लक्ष्यते। प्रौढा तु कथनस्य प्रस्तुतौ प्रकर्षविशेषं दर्शयति शब्दार्थाभ्याम्। कोमला च कोमलकांतपदप्रयोगैरेव सहृदयहृदयान्याह्लादयति। श्रीमज्जवाहरयशोविजयमहाकाव्ये काव्यवृत्तितामममीषां प्रयोगा अपि महाकविना स्वप्रतिभयोपस्थापिताः सन्ति। अत्र यथोद्दिष्टक्रमेणासां काव्यवृत्तीनां समीक्षणमत्र दर्श्यते।

तत्रादौ भद्रा यथा-

**'सदैवमानं यदि वा विमाननं धनस्य**
**लाभोऽप्यथवाप्रहाणकम्।**
**भवेज्जयो वा यदि संपराजयो न**
**निश्चितार्थाद् विचलन्ति साधकाः।।'**

अस्मिन्नुदाहरणे सर्वाण्येव पदानि, 'न निश्चितार्थाद् विचलंति साधकाः' इति निर्देशेनाऽपि काव्यवृत्तिरिति मान्यते।

**'इक्ष्वाकुवंशविभवं तमसः क्षयाय,**
**श्रेयस्करं प्रणतभक्तिजुषामजस्रम्।**
**संस्थापकं विहितधर्मपरम्परायाः**
**श्रेयांसनाथजिनमेवमहं नमामि।।'**

अस्मिन्नुदाहरणे सानुप्रासिकपदावल्याः सम्प्रयोगे-पदलालित्यं समुपस्थापितम् अस्ति। यकार-वकार-पकार-नकाराणामावृत्तिरत्र लालित्याभिव्यंजिकाऽस्ति। टवर्गीयाणां कठोरवर्णानां प्रयोगोऽत्र नास्ति। तस्माद् ललिताख्या काव्यवृत्तिर्मन्तव्या।

अथ परुषा यथा-

**'त्वत्सन्निधानमभिलभ्य जगद्विशिष्टं**
**सर्वातिशायि सकलैर्मनुजैरभीष्टम्।**
**दोषाः समस्तबलिनोऽबलिनोभवन्ति**
**सूर्यप्रकाशपरिधौ न तमोविलासः।।'**

अस्मिन्नुदाहरणे सघोष-महाप्राणवर्णप्रयोगः टकारस्य प्रयोगः ऊष्मवर्णानां प्रयोगश्च पारुष्यं जनयति। ओजः कान्तयोर्गुणयोरपि संस्थितिरत्र परुषत्वसहयोगिनी वर्तते। परुषवर्णानां ध्वन्यमानतायां कोमलकांतवर्णानांप्रभावोऽत्र स्वत एवापास्तो भवति। एवंचेत् परुषानाम्नी काव्यवृत्तिरत्र स्वीकार्या।

अथ प्रौढा यथा-

**'दृष्टिद्वयं वस्तुनिरूपणस्य**
**द्रव्यार्थिकी सा प्रथमा निर्दिष्टा।**

**पर्यायरूपा च परा प्रयुक्ता**

**शेषा तु शाखा कथिताऽनयोश्च।।'**

अस्मिन्नुदाहरणे वर्ण्यविषयगता प्रौढता वर्तते तत्प्रतिपादयितुं विधीयमानायां पदयोजनायामपि तदनुपमं प्रौढत्वमस्ति। अर्थस्यापि प्रौढिरत्र शाब्दबोधे विज्ञाता भवति। शास्त्रीयविषयानुरूपं पारिभाषिकशब्दानां प्रौढत्वं परिलक्ष्यते। तस्मादत्र प्रौढाख्या काव्यवृत्तिः स्वीकार्या।

अथ कोमला यथा-

**'हृदयान्तरान्ननु जायमानो दयार्द्रभावोदयनीयजन्तोः।**

**सन्तापतापोर्मिमपाकरोति प्रमाणमस्त्यत्र जिनेन्द्रवाणी।।'**

अस्मिन्नुदाहरणे कोमलकान्तपदानां प्रभावः सातिशयो विद्यते। सानुप्रासिकपदावलीप्रयोगोऽत्र माधुर्यं जनयति। नकार-तकारयोः नकारयुगलस्यरकारदकारयोः रकारमकारयोः नकारदकाराणां च संयोगोऽपि न केवलं माधुर्यम् अपितु लालित्येऽपि हेतुभूतोऽस्ति। कठोरवर्णप्रयोगश्च न क्वापि दृश्यते। तस्मात् कोमला नाम वृत्तिर्मन्तव्या। इयं कोमलैव मधुराऽप्युच्यते।

**शोधार्थी**

**साहित्यविभागः,**

**ज.रा.राजस्थान-संस्कृत-विश्वविद्यालयः, जयपुरम्**

**9251591650**

# च्योतेयन्नयने ननु ( शिवस्तुतिः )

**❑ कौशलतिवारी**



पादपद्माय कान्ताया दत्तहस्तमहोत्पलः। पातु देवश्शिवो नस्सः प्रणयप्रणिदर्शनः।।

नन्दी भूत्वा तव द्वारे तिष्ठासामि महेश्वर!। निवेदनानि शुश्रूषे मध्यस्थो ह्यहमन्वहम्।।

कैलासनाथ! कामं मे वासस्य पुरतस्तव। यज्ज्ञानुभ्यां निषण्णोऽहं च्योतेयन्नयने ननु ।।

महादेव! प्रदेशे ते सर्वत्र गुञ्जितानि वै। शृण्वन् किन्नरगीतानि च्योतेयन्नयने ननु।।

वासन्ते शिव! कैलासं तत्राजिगमिषाम्यहम्। सुनक्षत्रपथाधश्च च्योतेयन्नयने ननु ।।

त्वद्भक्तोऽहं दरीदृश्ये भद्रं स्वप्नं मनोहरम्। विचरामि प्रदेशे हि गृहीत्वांगुलिकां शिव!।।

नेत्रयोर्दर्शनं सास्रं देहः क्षेत्रे भवेत्तव। शिवनाम मुखे मे स्यात्र मोक्षं कामये तदा।।

अवरुद्धो नु कण्ठो मे नाम ते जपतो यदा। काव्ये शिवेति लेखित्वा रंजयामि मनस्तदा ।।

**बारां, राजस्थानम्, मो. 9460004244**

# आभासीयवर्गस्य परिप्रेक्ष्ये अभिक्रमिताधिगमः

❑ बोलतीराम मीना

**'संस्कृते संस्कृतिर्ज्ञेया संस्कृते सकलाः कलाः।**
**संस्कृते सकलं ज्ञानं संस्कृते किन्न विद्यते।।'**

शिक्षणं नाम कला इति, विज्ञानमिति च शिक्षाविदामभिप्रायः। शिक्षणम् कला इति ये मन्यते, तदनुसारं शिक्षकः जन्मजातः भवति। जननसमये एव विशिष्टशिक्षणकौशलानि सहजतया एव प्राप्नोति।

शिक्षणं विज्ञानमिति ये मन्यते, तेषामनुसारं प्रशिक्षणेन शिक्षकस्य निर्माणं भवति। अपि च तस्मिन् शिक्षके शिक्षणकौशलानि विकासनीयानि च भवन्ति। एतेषां धारणा एवमस्ति यत विज्ञानस्य, प्रविधिशास्त्रस्य च प्रभावेन शिक्षाजगतः विकासः समभवत् इति।

**अभिक्रमिताधिगम** :- अभिक्रमिताधिगमे शिक्षणवस्तु अल्पाल्पभागैः विभक्तं भवति। अपि च शृंखलाबद्धं भवति, अर्थात् अभिगमकर्त्ता स्वज्ञानस्य आधारेण नूतनज्ञानं स्वयमेव प्राप्नोति। अभिक्रमिताधिगमे अधिगन्ता सक्रियः भवति। स्वबुद्धेः अनुसारं पठने अग्रे गन्तुं प्रभवति। अपेक्षितसमये एव तस्य प्रतिपुष्टिः मिलति।

**परिभाषा - डी.यल.कुक महोदयानुसारेण** - अभिक्रमिताधिगमः स्वशिक्षणविधीनां व्यापकाय प्रयुक्तः विधिः।

**स्टीफल महोदयानुसारेण** - ज्ञातान् अल्पविषयान् क्रमेण व्यवस्थापनाय या सम्पूर्णप्रक्रिया विद्यते तस्या एव अभिक्रमिताधिगम इति नाम।

**आर.एविल् महोदयानुसारेण** - अभिक्रमिताधिगमः न केवलं स्वाध्यायाय निर्मितं पाठ्यवस्तु अस्ति। अपि तु उत्तमः एकः शिक्षणविधिश्च।

**सिद्धान्ताः** -

1. स्वबुद्धिशिक्षणसिद्धान्तः।
2. छात्रानुक्रियासिद्धान्तः।
3. अंशादंशसिद्धान्तः।
4. सक्रियासिद्धान्तः।
5. सहभागितासिद्धान्तः।
6. तत्कालप्रतिपुष्टिसिद्धान्तः।
7. विविधसामग्रीसिद्धान्तः।
8. छात्रपरीक्षणसिद्धान्तः।
9. प्रगतिज्ञानसिद्धान्तः।
10. व्यवहारविश्लेषणसिद्धान्तः।

**वैशिष्ट्यम्** - इयं सामग्री वस्तुनिष्ठा भवति।

- एकस्मिन् समये एक एव पठितुं प्रभवति।
- सामग्री अल्पाल्पांशरूपेण विभक्ता भवति।
- सामग्री तार्किकक्रमे सुव्यवस्थिता वर्त्तते।
- सामग्री शृंखलाबद्धा भवति।

- छात्राणां तत्काले एव तस्य प्रगतिविषये सूचना मिलति।
- तेन छात्राः ज्ञातुं शक्नुवन्ति यत् तैः विहितः प्रयासः साधु वा दोषपूर्णो वेति। एवं प्रकारेण तत्काले एव तस्य पृष्ठपोषणं लभ्यते।
- स्वबुद्ध्यनुसारं विषयवस्तुशिक्षणं प्राप्नोति।
- अभिक्रमितसामग्री पूर्णपरीक्षिता, क्रमयुक्ता च भवति।
- शिक्षणार्थिभिः सततं प्रयत्नः विधेयः भवति। तेन सक्रियता भवति।
- अभिक्रमितसामग्र्यां छात्राणां पूर्वव्यवहाराणाम्, धाराणानां विशिष्टकरणं क्रियते।
- अभिक्रमिताधिगमे सामग्र्यां प्रतिपुष्टिः अधिगन्त्रा तत्क्षणे एव प्राप्यते।
- एतेषां व्यवहाराणां भाषा सरला स्यात्।
- अपि च बोधगम्यता-उपलब्धि-पृष्ठभूमी-मानसिकस्तरेषु च ध्यानं दातव्यं भवति।
- अत्र उद्दीपनम्, अनुक्रिया, पुनर्बलनं-एतानि त्रीणि क्रियाशीलानि भवन्ति।
- अतः छात्राणाम् अनुक्रियाः पुनर्बलयुक्ताः भवन्ति।
- ताः अनुक्रियाः प्रभावोत्पादकशिक्षणे सहायकाः भवन्ति।
- छात्राणां प्रत्येकोऽपि प्रयासः तस्मै एकैकं नूतनं ज्ञानं ददाति।
- अभिक्रमित-अनुदेशनसामग्रयाः अध्ययनसमये अधिकं तत्परता, जिज्ञासा च अपेक्षते। अनेन हेतुना छात्राः शीघ्रातिशीघ्रं विषयवस्तु अवगच्छन्ति।
- अभिक्रमिताधिगमे-सामग्रीशिक्षणे त्रुटीनां, दोषानां प्रतिशतता न्यूना भवति।

अभिक्रमितानुदेशन प्रणाली मनोवैज्ञानिकधिगम-सिद्धान्तस्य आधारेण प्रचलति।

**लाभाः**

1. छात्राणाम् आत्मविश्वासः आत्मनिर्भरता च विकसितौ स्तः।
2. प्रतिपुष्टिकारणतः छात्रेभ्य अभिप्रेरणा सम्यक् मिलति।
3. स्वयं किञ्चित् कृत्वा अनुभवं प्राप्नोति।
4. अभिक्रमितानुदेशने छात्राः सततं सक्रियाः भवन्ति।
5. स्वाध्यायस्य अभ्यासः जायते।
6. छात्रेषु अभिरुचिः भवति।
7. संरचनात्मकशक्तेः वर्धनं भवति।
8. विभिन्नविषयाणां तार्किकं विश्लेषणं कृत्वा सुगमतया शिक्षणं प्राप्तुं शक्नुयात्।
9. शिक्षकस्य उपस्थिति अनिवार्या।

10. प्रणाली इयं पुनर्बलनसिद्धान्तस्य आधारेण कार्यं करोति।
11. प्रणालीयं सरलात् कठिनं प्रति ज्ञातादज्ञातं प्रति इति शिक्षासूत्राणां क्रमेण छात्राणां समक्षं प्रस्तूयते।
12. अनुशासनस्य समस्या एव न भवति।
13. छात्रेषु रचनात्मक-तर्क-विचारात्मक निर्णयात्मशक्तीनां विकासे सहायतां करोति।

**सामग्रीनिर्माणम्**

निर्माणेऽस्मिन् नवभागाः सन्ति।

1. प्रकरणस्य, शीर्षकस्य वाचनम्।
2. छात्राणां पूर्वज्ञान-पूर्वानुभव-सम्बन्ध-सूचनालेखनम्।
3. व्यवहाररूपे उद्देश्यानां लेखनम्।
4. विषयवस्तुनः स्वरूपनिर्माणम्।
5. मापदण्डपरीक्षायाः निर्माणं।
6. अभिक्रमलेखनम्।
7. प्राथमिकप्रतिवेदनलेखनम्।
8. प्रतिवेदनपरीक्षणम्।
9. मूल्याङ्कनम्, क्रमनिर्धारणं च।

**अभिक्रमिताधिगमस्य प्रकाराः -**

1. रेखीयाभिक्रमः।
2. शास्त्रीयाभिक्रमः।
3. मैथेटिक्स अभिक्रमः।
4. स्वनिर्देशिताभिक्रमः।
5. सङ्गणकाधारिताभिक्रमः।

**सन्दर्भग्रन्थसूची -**


1. डॉ. विद्याधर शर्मा गुलेरी, (2000) 'संस्कृत में विज्ञान', संस्कृतभारती, मातामन्दिरगली, झण्डेवाला, नवदेहली।
2. डॉ. रघुनाथ सफाया, (1979) संस्कृतशिक्षण, हरियाणा साहित्य अकादमी, चण्डीगढ़।
3. डॉ. कम्भम्पाटि साम्बशिवमूर्तिः 2006 संस्कृतशिक्षणम्, दीपशिखा प्रकाशन, जयपुर।
4. डॉ. विश्वास, 2005 कौशलबोधिनी, संस्कृत भारती, मातामन्दिरगली, झण्डेवाला, नई दिल्ली 110055
5. डॉ. मित्तल, सन्तोषः (2006) संस्कृतशिक्षणम्, जयपुरम्, नवचेतनाप्रकाशनम्।
6. डॉ. फतेहसिंहः (2008) शिक्षामनोविज्ञानम्, जयपुरम्, आदित्यप्रकाशनम्।
7. डॉ. उदयशंकर (2011) संस्कृशिक्षण, वाराणसी, चौखम्भा सुरभारती प्रकाशन।



**प्रशिक्षितस्नातकशिक्षकः ( संस्कृतम् )**

**केन्द्रीयविद्यालयसंगठनम्**

**नवदेहली**

पुस्तक-समीक्षा

# अभिराजपञ्चशती

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

सुप्रथितस्य कविसार्वभौमस्य राष्ट्रपति-सम्मानितस्य पद्मश्रीत्यलङ्करणेन सभाजितस्य पूर्वकुलपतेः प्रो. अभिराजराजेन्द्रमिश्रस्य नवीनतम काव्यसङ्ग्रहप्रकाशनेष्वन्यतमः काव्यसंग्रहः 'अभिराज पञ्चशती' विविधेषु च्छन्दःसु समये समये विरचितानां पद्यानां शतकपञ्चकं प्रस्तौति। एतस्मात् पूर्वमपि कविप्रवरस्यास्यानेकानि शतकानि प्रकाशितानि सन्तीति जानीयुरेव सुधियः। शतकपञ्चकेऽस्मिन् प्रथम-मभिराजशतकं 1975 ई. वर्षतः 1995 ई. वर्षपर्यन्तं विंशतिवर्षेषु समये समये प्रमुखतः शार्दूल विक्रीडितच्छन्दसि विविधभावधारा अभिव्यञ्जयतां 105 पद्यानां सङ्कलनं मानसीरभिव्यक्तीः प्राञ्जलतया प्रस्तौति। कतिपये निर्वेदाभिव्यञ्जका भावाः, कतिपया आत्मा-भिव्यक्तयः स्पष्टमेतेषु पद्येषु प्रस्तुता इति कविरेतत् सङ्कलनं **'प्राणगीता'** इत्यभिधानेन सूचयति। प्रतिपद्यमन्ते काव्यप्रणयनस्य तिथिः सूचिताऽस्ति। तदिदं शोधार्थिनां सम्यङ् मार्गदर्शनं कुर्यात्।

द्वितीयं **मुक्तिशतकं** श्रीमद्भगवद्गीतायां प्रतिपादितं जीवनदर्शनं वास्तविकं मुक्तिमार्गं, कर्मयोगं च 104 अनुष्टुप्छन्दसि निबद्धेषु पद्येषु प्रस्तौति। दीपावल्युत्सवे (2020 वर्षस्य) विरचितमासीदिदं शतकं मुक्तिसाहित्यमस्तीति कविरन्तिमे पद्ये वक्ति। शतकेऽस्मिन् गीतायाः सन्देशः कविना सरलया शैल्या स्वभाषायां प्रस्तुतो यथा 'मित्रे शत्रौ च यस्तुल्यस्तुल्यो मानापमानयोः। तटस्थः सुखदुःखेषु जगन्नाथस्य स प्रियः।।' (88)

तृतीयमस्ति निषेधशतकं यन्नूतनमेवैकं प्रयोगं प्रतिनिदधाति। अल्पप्रयुक्ते मात्रिकच्छन्दसि (पादाकुलके) निबद्धानि शतं पद्यानि प्रतिपद्यं कञ्चन निषेधमभिव्यञ्जयन्ति। 'ग्रामे ग्रामे न मयूराः' 'जले जले नोत्तुङ्गतरङ्गाः' इत्यादि वर्णयन् कविः हृदयावर्जकशैल्यां 'कुत्र किं नाऽस्तीति प्रबोधयन् मौलिकतां काव्यप्रणयनस्य प्रमाणयति। 'वंशे वंशे नो पराशरः, प्रतिपराशरं नो व्यासमुनिः।' व्यासे व्यासे न च शुकदेवो वैराग्यविग्रहो भागवतः। (86) छन्दसो नावीन्येन सहाभिव्यक्तेर्नावीन्यं द्रष्टुमत्र शक्यते, विषयस्य नावीन्यं तु स्पष्टमेव।

इत्थमेवाऽल्पप्रयुक्ते **अश्वधाटीति** नाम्ना विदिते विकटच्छन्दसि निबद्धानां पद्यानामस्ति चतुर्थं शतकम्। प्रतिचरणमनुप्रासबहुलायामश्वधाट्यां काव्यरचना कियती दुर्घटाऽस्तीति जानीयुरेव विद्वत्प्रवराः। अश्वधाटीषु विविधानां देवानां स्तवनमस्ति निबद्धं कविवर्येणाभिराजराजेन्द्रमिश्रेण। गणपत्यश्वधाटी 11 पद्येषु, शारदायाः (सरस्वत्याः) स्तवनाश्वधाटीसंग्रहः 11 पद्येषु, इत्थं अम्बाश्वधाटी 11 पद्येषु, एवं 11 पद्येषु देवस्तवनाय नव देवताः पूजिताः कविना 99 पद्यैः। दशमोऽश्वधाटीबन्धः स्वकीयं कथ्यं प्रतुष्टुषुणा कविना 'अभिराजाश्वधाटी' नाम्ना प्रणीतः शताधिक-

मश्वघाटीसङ्कलनं दर्शयति।

पञ्चमं शतकं साम्प्रतं प्रवर्तमानाया वैश्विकमहामार्याः 'कोरोना'ख्याया विविधानायामान्, निवारणोपायान्, देशजां वस्तुस्थितिं, स्वकीयमभिमतं च तस्या उपरि व्यनक्ति- 'कोरोनाशतकम्' नाम्ना। अनुष्टुप्छन्दांसि निबद्धानि 115 पद्यान्यन्तिमं पञ्चममेतच्छतकं प्रस्तुवन्ति। अन्तिमे पद्ये काव्यरचनाया दिनाङ्कः 18 मार्च 2020 इति रूपेण सूचितोऽस्ति। सम्पादकेन शतकस्यास्य नाम 'कोरोनाशतक' मित्येव शीर्षके सूचितं किन्तु कविरन्ते शतकमिदं 'करुणाशतकं' निर्दिशति। सत्यमेव। स्पष्टं करुणाया एवाऽयमवसरः।

'अभिनवशतकसङ्कलना' इत्यभिधानं ग्रन्थस्यास्य सूचयति सम्पादकः यतोहि कविवर्यस्याभिराजराजेन्द्रमिश्रस्य बहुसंख्याकानि शतकानि प्रकाशितपूर्वाणि। विपुलानामेषां शतकानां सूचना सम्पादकीये प्रत्ताऽस्ति। शतकसाहित्यमिदं सुविपुलं नूतनमेवेतिहासं प्रवर्तयति। सपदि प्रकाशनानां राजेन्द्रमिश्रवर्यस्य ग्रन्थानां सम्पादकः डॉ. अनिल प्रतापगिरिः मोतिहारी (बिहार)स्थे केन्द्रीय विश्वविद्यालये सहाऽऽचार्योऽस्ति, प्रो. अभिराजराजेन्द्र मिश्रं सर्वात्मना स्वकीयं गुरुवर्यं घोषयति, प्रो. मिश्रोऽपि तस्मै प्रभूतं स्नेहं व्यनक्ति वक्ति च यद् बहवे कालाय नाऽभूदयं तच्छिष्यः किन्तु सविनयं शिष्यत्वं स्वीकुर्वाणोऽयं तस्य कृते 'एकलव्यो'ऽस्तीति सविनोदमेतस्य 'नान्दीवाचि' सूचयति कविवर्यः।

ग्रन्थस्य प्रारम्भे कविसार्वभौमस्य म.म. अभिराजराजेन्द्रमिश्रस्य 'नान्दीवाक्' हिन्द्यां मुद्रिता सम्पादकस्य डॉ. अनिलप्रतापगिरिवर्यस्य संस्कृते मुद्रित सम्पादकीयं शतकसाहित्यस्य विवरणं प्रस्तौति, शतकपञ्चकस्यास्य परिचयं चाऽपि कारयति। कविसार्वभौमस्य एवंविधास्त्रयः काव्यसंग्रहाः सम्पादकस्यास्य सम्पादने सपद्येव प्रकाशमायाता इति सूचयन्तो वयं प्रमोदमनुभवामः।

**अभिराजपञ्चशती:** कविः कविसार्वभौमः मिश्रोऽभिराजराजेन्द्रः, सम्पादकः डॉ. अनिलप्रतापगिरिः, प्रकाशकः वैजयन्त प्रकाशन, इलाहाबाद, पृ.सं. 88, मू. 400/-

## फ्रांसदेशीयोपन्यासः संस्कृतेऽनूदितः

फ्रांसदेशीयायाः फ्रेंचभाषाया विश्वविदित उपन्यासकारोऽस्ति **विक्टरह्यूगो** महोदयः। गतशताब्द्यां समस्तेऽपि विश्वे प्राप्तयशस्कस्य ह्युगोवर्यस्य विशाल उपन्यासोऽस्ति 'ले मीजेराब्ल' शीर्षको यस्मिन् एकोनविंशशताब्दीये युद्धे देशेनाऽनुभूतानां समस्यानां, पीडानां च हृदयावर्जकं वर्णनमस्ति निबद्धम्। विशालेषु पञ्चसु भागेषु निबद्धस्याऽस्योपन्यासस्यानुवादा विश्वस्य विविधासु भाषासु विहिताः। विश्वभाषायां संस्कृतेऽप्यस्यानुवादः प्रकाशित इति ज्ञात्वा प्रसीदेयुः पाठकाः। उपन्यासस्यास्यानुवादो गुर्जरभाषायां संक्षिप्य भागद्वये कृतोऽभूत् श्रीमूलशङ्कर मो. भट्टवर्येण 'दुखियारा' शीर्षकवहः। तस्य गुर्जरानुवादस्य संस्कृतेऽनुवादो विहितोऽस्ति मुनिरत्नकीर्तिविजयवर्येण 'चिरदुःखितः' शीर्षकवहः। अत्र हि भागद्वये समस्तमप्युपन्यासस्य विषयवस्तु समाहितम्।

उपन्यासस्य नायकः **ज्यों वाल्जों** कथं

विविधानां विपदां सम्मुखीकरणं कुरुते इत्युपन्यासस्य कथावस्तु। कथायाः प्रस्तुतिर्यथावदनुवादविधया विहिताऽस्ति। पात्राणां नामान्याङ्गलभाषाऽनुरूपं सूचितानि। 'ज्यों वाल्जों जिनवाल्जिन' इत्युट्टङ्कितः। फ्रेंचभाषाया उच्चारणानि न प्रत्तानि। मूलोपन्यासस्य नाम 'ले मीज़राब्ल' इति फ्रेंच भाषानुरूप उच्चार्यते किन्तु नेयं समस्याऽनुवादे सम्मुखीकृता प्रकाशनेऽस्मिन्। भूमिकायां परिचये च मूलोपन्यासस्योच्चारणं देवनागरीलिप्यां नोट्टङ्कितं, रोमनलिप्यां 'Les Miserables' इत्येव सर्वत्र यथावन्मुद्रितम्। अनुवादस्य भाषा शुद्धा, सुललिता, सुबोध्या चाऽस्तीति सुतरां धन्यवादार्हः श्रीमुनिरत्नकीर्तिविजयवर्यः।

उपन्यासस्य प्रकाशनं बेङ्गलूरुस्थया सुप्रथितया संस्कृत-संस्थया संस्कृतभारत्या कृतमस्तीति शतशो धन्यवादा उचिताः सन्ति संस्थायाः कृते। मुनिरत्नकीर्तिविजयवर्योऽपि सुविदितः संस्कृतजगति यतो ह्ययं 'नन्दवनकल्पतरु' नाम्न्याः सुप्रथितायाः संस्कृत षाण्मासिकपत्रिकायाः सम्पादकरूपेण सुविदितायाः मुनित्रय्या एकः सदस्योऽस्ति। उपन्यासो भागद्वये विभक्तः। प्रथमे भागे 'धिक्कारः' 'सत्कारः' 'आतिथ्यकृत्' इत्यादिशीर्षकैः कथा विभाजिताऽस्ति 34 विभागेषु, द्वितीयेभागे च 'परिभ्रामकः' 'मेरियसः' 'गृहत्यागः' इत्यादिशीर्षकैः 46 विभागेषु कथा संनिबद्धा। फ्रांसदेशीयस्य विशिष्टसाहित्यस्य सेयं संस्कृतेऽवतारणा सुरभारत्या विश्वजनीनतायशः प्रखरीकरोतीति सर्वात्मना प्रशस्यमिदं प्रकाशनम्।

चिरदुःखितः (फ्रांसदेशीयोपन्यासस्य संस्कृतानुवादः) मूललेखकः विक्टर ह्यूगो, गुर्जरानुवादः मूलशङ्करः मो. भट्टः, संस्कृतानुवादकः मुनिरत्नकीर्तिविजयः, प्रकाशक-संस्कृतभारती, 'अक्षरम्' 8 उदयमार्गः, 2 घट्टः, गिरिनगरम्, बेङ्गलूरु, पृ.सं. 450, मूल्यम् 200/-

---

# पाठक-प्रतिक्रिया

'भारती पत्रिका' की मैं नियमित पाठक हूँ। पत्रिका के सम्पादकीय विलक्षण और ज्ञानवर्धक हैं। दिसम्बर, 2021 का '**हिन्दुत्वाभिसम्बन्धात् तु हिन्दुः**' सम्पादकीय में शास्त्रीय उदाहरणों से 'हिन्दुत्व' और 'हिन्दु' के अभेद को सिद्ध करना प्रशंसनीय है। सद्यः प्राप्त जनवरी, 2022 के अंक में सेनाप्रमुख 'विपिन रावत' और अन्य वीरगति को प्राप्त सैनिक अधिकारियों पर 'सम्पादकीय' पत्रिका को अद्यतन सिद्ध करता है। अभिनव-पुस्तक-समीक्षा, पं. नथमल शास्त्री जी की स्तोत्र-कवितायें, आयुर्वेदस्तम्भ तथा नारीस्तम्भ 'भारती' पत्रिका को अन्य पत्रिकाओं से विशिष्ट बनाते हैं।

पत्रिका व्याकरण की दृष्टि से सर्वथा शुद्ध और परिमार्जित प्रकाशित हो रही है, यह वैशिष्ट्य अन्यत्र दुर्लभ है। पत्रिका की पाठ्यसामग्री स्तरीय है, अतः 'भारती पत्रिका' अस्मादृश पाठकों को आनन्दानुभूति कराती है। इसके लिए सम्पादक-मण्डल, विशेषतः विद्वान् सम्पादकमहोदय प्रोफेसर श्रीकृष्णशर्मा जी का हार्दिक अभिनन्दन।

**डॉ. अञ्जना शर्मा**
**एसोशियेट्-प्रोफेसर**
**संस्कृत-विभाग, वनस्थली विद्यापीठ**

नारी-स्तम्भः

# गन्ता गच्छति नागतिः

❑ डॉ. राजेश्वरी भट्टः

गौरवस्य विषयोऽयं वर्तते यत् 2021 तमे वर्षे वर्षपर्यन्तं विश्वस्मिन् विश्वे आयोजितासु विश्वस्तरीयासु भिन्न-भिन्न प्रतियागितासु, मीराबाई चानू, अवनि लेखरा, सिरीबा बाँदला, पी.वी.सन्धु- सदृशीनां असाधारण सामर्थ्यसम्पन्नानां भारतीयमहिलानां चमत्कृतिजनकैः प्रदर्शनैर्विशिष्टोपलब्धिभिश्च राष्ट्रं महिमामण्डितं जातम्। वर्षस्य अन्तिमचरणे दिसम्बरमासे 'इजरायल देशे' आयोजितायां **मिसयूनीवर्स** (ब्रह्माण्डसुन्दरी) इति प्रतियोगितायां (80) अशीतिदेशानां प्रतिभागिनीषु 'भारतदेशे' चण्डीगढ इति महानगरे निवसन्ती 'हरनाज सन्धू' प्रथमस्थानमधिगम्य 'मिसयूनीवर्स ब्रह्माण्ड सुन्दरी' इत्युपाधिना अलङ्कृता सम्मानिता, प्रशंसिता च जाता। नारीणां महदुपलब्धीनां क्रमोऽयं 2022 तमे वर्षेऽपि अविरतो दृश्यते। अस्मिन् क्रमे नववर्षस्य अरुणोदय एव ब्रिटिशसेनायां 'कैप्टन' पदे विभूषितायां भारतीयमूलस्य 'हरप्रीत-चंडी' विश्वस्य सर्वोच्चं, सर्वाधिकं शीतं, पूर्णतः हिमाच्छादितं, प्रचण्डवायुवेगे व्याप्तं निर्जनं दक्षिणध्रुवं प्राप्य नवेतिहासं व्यरचयत्। अनेन साहसिकेन दुष्करेणाभियानेन 'हरप्रीत चण्डी' विश्वे उच्चतमस्य **अंटार्कटिका** महाद्वीपस्य विजेत्री प्रथमा भारतीयमूलस्य अश्वेत महिला सदैव विश्वस्य तृतीया महिला जाता। लोके **पोलरप्रिया** इति नाम्नाऽपि अभिज्ञाता 'हरप्रीत चण्डी' 7 फरवरी 1989 तमे वर्षे U.K. स्थिते डर्बी नगरे जनिमलभत। बालिकायाः प्रारम्भिकी शिक्षा अस्या जन्मस्थान एव सम्पन्ना जाता। ततो 2009 तः 2012 पर्यन्तं 'हरप्रीत चंडी' लंदनस्थिते 'सेन्टजॉनविश्वविद्यालये' अध्ययनं कुर्वती, बी.एससी. परीक्षामुत्तीर्णवती सहैव 'फिजियोथैरेपी' विषयेऽपि प्रशिक्षणमधिगतवती। ततो 19 वर्षस्य वयसि 'हरप्रीत चण्डी' सेनायां कार्यरता जाता। अत्र हरप्रीतमहाभागानां दायित्वं सेनायां कार्यरतानां चिकित्सकानां कृते समुचितं प्रशिक्षणं प्रदातुमासीत्। 2019 तमे वर्षे उच्चाध्ययनस्य कृते 'हरप्रीत चण्डी' क्वीनमेरी यूनिवर्सिटी ऑफ लंदन इति संस्थाने प्रवेशमलभत। आत्मनो नैपुण्येन अन्तःसारेण च 25 वर्षस्य वयसि इयं ब्रिटिश सेनायाः सिखदले कैप्टनपदे नियुक्ता जाता। ततो व्यक्तिगतजीवने आत्मानं एकाकिनीं अन्वभवन्ती 'हरप्रीतचण्डी' 2021 तमे वर्षे ब्रिटिशसेनाया कार्यरतेन युवकेन 'डेविडजारमनेन' सह विवाहं व्यरचयत्। सम्प्रति सर्वथा सम्पन्ना सुस्थिराऽपि 'हरप्रीतचण्डी' वर्तमानेन सन्तुष्टा नाऽऽसीत्। केवलं अशनं, वसनं, शयनमेव अस्याः कृते जीवनलक्ष्यं नास्ति। किञ्चिद् सामान्यं कर्तुं सा प्रतिक्षणं व्यग्राऽदृश्यत। ततः आत्मनः स्वप्नं प्रत्यक्षं कर्तुं 'हरप्रीतचण्डी' विश्वस्य उच्चतमं दुर्गमं 'दक्षिण ध्रुवं' प्रति गन्तुं दृढसंकल्पवती जाता। अवगततथ्यैः हितैषिभिः परिचितैश्च भूयो भूयो वार्यमाणाऽपि 'हरप्रीतचण्डी' मनागपि विचलिता न जाता, परं दृढेन कटिबद्धा जाता। इदानीं यात्राकाले प्रतिकूलपरिवेशे अभिमुखीनां विपदां निवारणाय समुचितप्रबन्धस्य कृते 'हरप्रीतचण्डी' तत्परा जाता। द्विमासपूर्वमेव इयं हिमाच्छादितं स्थानं गत्वा भारयुक्तां शकटिकां कर्षयन्ती पदातिभ्रमणस्य अभ्यासं कृतवती। सम्प्रति आत्मन्येवात्मना तुष्टा 'हरप्रीतचण्डी' 24 नवम्बर 2021 तमे वर्षे अंटार्कटिकामहाद्वीपस्य 'हरक्यूलिसइनलेट' इति स्थानात् अनन्यैव 1027 कि.मी. इति हिमाच्छादिते विकटे शून्यात् 50 बिन्दुन्यूने मार्गे प्राणान्करतले कृत्वा, मृत्योर्दोलायां दोलायमाना 40 दिवसेषु दक्षिणध्रुव इति आत्मनो गन्तव्यं प्राप्य 3 जनवरी 2022 तमे दिवसे विश्वस्मिन् विश्वे विश्रुता जाता। यात्राकाले इयं संचारमाध्यमेन संततं सम्बद्धा आसीत्, यथासमयं प्रकृतेः चित्राण्यपि तया प्रेषितानि।

सम्प्रति उत्तरीध्रुवस्य यात्रायै प्रस्थानं हरप्रीत महाभागायाः संकल्पोऽस्ति चंडीव हरप्रीत चण्डी नूनं विश्वस्य कृते प्रेरणास्रोतोऽस्ति।

## हिन्दी अनुवाद

यह परम गौरव का विषय है कि सन् 2021 में वर्षभर विश्व में आयोजित विश्वस्तरीय भिन्न भिन्न प्रतियोगिताओं में मीराबाईचानु, अवनिलेखरा, सिरीषाबांदला, पी.वी.सन्धु जैसी असाधारण सामर्थ्य से सम्पन्न भारतीय महिलाओं के आश्चर्यजनक प्रदर्शन एवं विशिट उपलब्धियों ने राष्ट्र को महिमामण्डित किया है। वर्ष के अन्मि चरण में दिसम्बर मास में 'इजरायल' देश में आयोजित '**मिसयूनीवर्स**' (ब्रह्माण्डसुन्दरी) प्रतियोगिता में अस्सी देश की प्रतिभागियों में भारतदेश के चण्डीगढ़ महानगर निवासिनी '**हरनाज सन्धू**' ने प्रथम स्थान प्राप्त कर **ब्रह्माण्डसुन्दरी** की उपाधि से अलंकृत, सम्मानित एवं प्रशंसनीया बनी। नारियों की महान् उपलब्धियों का यह शानदार क्रम सन् 2022 में भी अविरत प्रवर्तित है। इसी क्रम में नववर्ष के अरुणोदय में ही 'ब्रिटिश सेना' में 'कैप्टन' पद पर विभूषित भारतीय मूल की 'हरप्रीत चण्डी' ने विश्व के सर्वोच्च सर्वाधिक ठंडे, बर्फ से ढके, प्रचण्डवायुवेग से व्याप्त जनशून्य 'दक्षिणी ध्रुव' पर पहुँचकर विश्व में नया इतिहास रच दिया। इस दुष्कर एवं साहसिक अभियान की सफलता से 'हरप्रीत चण्डी' विश्व के उच्चतम 'अंटार्कटिक महाद्वीप' की विजेत्री, भारतीय मूल की प्रथम अश्वेत महिला, साथ ही विश्व की तीसरी महिला बन गई है। लोक में '**पोलरप्रिया**' के नाम से भी परिचित 'हरप्रीत चण्डी' का जन्म 7 फरवरी 1989 को U.K. में स्थित 'डर्बी' नगर में हुआ था। बाल्यावस्था में इनकी शिक्षा जन्म स्थान डर्बी नगर में ही सम्पन्न हुई। हरप्रीत चण्डी ने सन् 2009 से 2012 तक लंदन में स्थित सेन्ट जॉन विश्वविद्यालय से बी.एस.सी. की परीक्षा उत्तीर्ण की साथ ही 'फिजियोथैरेपी' विषय में भी प्रशिक्षण प्राप्त किया। 19 वर्ष की अवस्था में 'हरप्रीत चण्डी' का दायित्व सेना में कार्यरत चिकित्सकों की देखभाल करना तथा उन्हें प्रशिक्षित करना था। 2019 ई. में हरप्रीत चण्डी ने उच्च अध्ययन के लिए 'क्वीन मेरी यूनिवर्सिटी ऑफ लंदन' में प्रवेश प्राप्त किया। अपने नैपुण्य एवं सारवत्ता से 'हरप्रीत चण्डी' 25साल की उम्र में 'ब्रिटिश सेना' के सिखदल में 'कैप्टन पद पर' नियुक्त हो गई। अपने व्यक्तिगत जीवन में अपने को एकाकी अनुभव करती हुई हरप्रीत चण्डी ने 2021 ई. में ब्रिटिश सेना में कार्यरत '**डेविड जारमेन**' नामक युवक से **विवाह** कर लिया। सर्वथा सम्पन्ना तथा सुस्थिर जीवन व्यतीत करने पर भी हरप्रीत चण्डी अपने वर्तमान से पूर्णतः सन्तुष्ट नहीं थी। केवल खाना, पीना, सोना तथा सजना ही जीवन का लक्ष्य नहीं है- यह मानने वाली हरप्रीत चण्डी कुछ असामान्य करने को प्रतिक्षण व्यग्र रहती थी। अपने इस स्वप्न को साकार करने के लिए हरप्रीत चण्डी ने विश्व के सर्वोच्च, सबसे अधिक ठंडे, हिमाच्छादित, प्रचण्ड वायु वेग से व्याप्त निर्जन दक्षिणीध्रुव पर जाने का दृढ़ संकल्प किया। हरप्रीत चण्डी के संकल्प से अवगत हितैषियों एवं परिचितों द्वारा बारम्बार समझाए जाने एवं रोके जाने पर भी हरप्रीत चण्डी अपने संकल्प से तनिक भी विचलित नहीं हुई अपितु पूर्णतः कटिबद्ध हो कई। यात्राकाल में सामने आने वाली विपदाओं का निवारण कैसे हो? इसका प्रबन्ध करने के लिए दो मास पूर्व ही वह व्यग्र थी। हिमाच्छादित प्रदेश में जाकर भारयुक्त गाड़ी को पैदल खींचकर अभ्यास करती थी। अपने प्रयास से सन्तुष्ट चण्डी ने 24 नवम्बर, 2021 ई. को 'अंटार्कटिका महाद्वीप' के 'हरक्यूलिसइनलेट' से अकेले ही 1027 किलोमीटर हिमाच्छादित, भयावह, शून्य से 40, 50 बिन्दु नीचे तापमान वाले मार्ग पर प्राणों को हथेली पर रखकर, मृत्यु के झूले में झूलते हुए 40 दिनों में अपने गन्तव्य पर पहुँचकर 3 जनवरी 2022 ई. को समस्त विश्व में प्रसिद्ध हो गई। यात्रकाल में हरप्रीत चण्डी संचार माध्यम से निरन्तर सम्पर्क में रही। यथासमय प्रकृति के विभिन्न चित्रों को भी भेजती रही। अब 'हरप्रीत चण्डी' का संकल्प उत्तरी ध्रुव की यात्रा करने का है। साक्षात् चण्डी के सामने हरप्रीत चण्डी निश्चय ही विश्व के लिए प्रेरणा स्रोत है।

**- पूर्वविभागाध्यक्ष ( संस्कृत )**
**लालबहादुरशास्त्री कॉलेज, जयपुर**

आयुर्वेद-स्तम्भः

# अपवारयेद्धि प्रतिश्यायम्

❑ प्रो. बनवारीलालगौड:
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**ऋतुपरिवर्तनसमये विशेषेण चर्तुसन्धिकाले विषमेऽपि चर्तौ शीतकाले तु विशेषेण प्रतिश्यायनामकेन विकारेण ग्रस्ताः भवन्त्यधिसंख्यजनाः। क्रमागतशिरोरोगचिकित्सायां वक्तव्यायां शिरोरोगप्रधानत्वाद्भूरिशिरोरोगहेतुत्वाच्च प्रतिश्यायमेव तावत्सर्वप्रथममुपवर्णितमाचार्येण चरकेण शिरोरोगेषु । ऊर्ध्वजत्रुगतं ह्येनं विकारमतिसामान्यं मन्यमानाः जनाः सामान्यतयास्योपेक्षाङ्कुर्वन्ति। द्वित्रदिनानि यावत्किञ्चिदधिकं कष्टमनुभूय पञ्चषदिवसेषु तु विमुक्तिं यान्त्यशेषतः रोगेणानेनाधिसङ्ख्यजनाः। अत एवोपेक्षाङ्कुर्वन्ति जनाः रोगस्यास्य, किन्तु न ह्येषः विकारः सामान्य इति संसूचितं महर्षिभिः संहिताग्रन्थेषु।**

ऋतुपरिवर्तन के समय में और विशेष रूप से तो ऋतुसंधिकाल में तथा ऋतु के वैषम्य में एवं शीतकाल में अधिकांश लोग प्रतिश्याय नामक विकार से पीड़ित होते है। क्रमप्राप्त कहने योग्य शिरोरोगचिकित्सा में शिरोरोगों में प्रधान होने के कारण तथा अनेक शिरोरोगों का हेतु होने के कारण प्रतिश्याय को शिरोरोगों में सर्वप्रथम आचार्य चरक ने वर्णित किया है। ऊर्ध्वजत्रुगत इस विकार को अत्यंत ही सामान्य मानने वाले लोग सामान्यतया इसकी उपेक्षा करते हैं। दो-तीन दिनों तक कुछ अधिक कष्ट का अनुभव करके 5-6 दिनों से इस रोग से अधिकांश लोग विमुक्ति को प्राप्त कर लेते हैं, इसलिए लोग इस रोग की उपेक्षा करते हैं, लेकिन यह विकार सामान्य नहीं है, ऐसा महर्षियों ने संहिताग्रंथों में संसूचित किया है।

**प्रतिश्यायस्य हेतवः-**

**सन्धारणाजीर्णरजोतिभाष्यक्रोधर्तुवैषम्यशिरोभितापैः रन्यैश्च प्रजागरातिस्वपनाम्बुशीतैः शीतोष्णाक्रमसेवनेनावश्यया बाष्पधूमैश्चोद्वेलितः प्रवृद्धश्च वातदोषः प्रतिश्यायं करोति। स्वेदवहस्रोतसां दुष्टिक्रम आचार्येण चरकेण निर्दिष्टं यत्-**
**व्यायामादतिसन्तापाच्छीतोष्णाक्रमसेवनात्।**
**स्वेदवाहीनि दुष्यन्ति क्रोधशोकभयैस्तथा।। (च.वि.५/२२)**

**प्रतिश्याय के हेतु-**

(मूत्रपुरीष इत्यादि) वेगो को रोकने, अजीर्ण, धूल, अत्यधिक बोलना, क्रोध, ऋतुवैषम्य, शिर का किसी भी विकृति से पीड़ित होना एवं अन्य हेतु रात्रि जागरण करने, अत्यधिक सोने से, अत्यधिक शीतल जल का सेवन करने से, शीत एवं ऊष्ण का उपयुक्त कर्म के बिना सेवन करने से तथा ओस का सेवन करने से, भाप एवं धुआँ से उद्वेलित (उत्प्रेरित) हुआ वात दोष प्रतिश्याय को करता है । स्वेदवहस्रोतस् के दुष्टिक्रम में आचार्य चरक ने निर्दिष्ट किया है कि अति व्यायाम से, अति संताप से तथा शीत एवं ऊष्ण का क्रमरहित सेवन करने से तथा क्रोध, शोक एवं भय से स्वेदवहस्रोतस् दूषित होते हैं।

**एतेषां सर्वेषामेव स्वेदवाहिदूषकाणां निदानानां प्रतिश्यायेऽपि कार्यकारित्वं वर्तते, विशेषेण तु शीतोष्णाक्रमसेवनात् प्रतिश्यायस्योत्पत्तिः प्रायेण जायते। वर्तमानकाले तु जनाः शीतोष्णाक्रमसेवनङ्कुर्वन्त्येव, ते हि बहुप्रचलितात् 'चाय' इति**

**नामकादुष्णपेयस्वरूपात्पूर्वमतिशीतजलसेवनङ्कुर्वन्ति। ग्रीष्मकाले प्रायशश्च 'ए.सी.' इत्यनेन यन्त्रेण शीतीकृतभवनात् सहसा बहिर्यान्त्यायान्ति चोष्णवातावरणाच्छीतीकृते भवने। एवमेवोष्णकालेऽपि 'हीटर' नामकेनोष्मप्रसारकेण यन्त्रेणोष्णीकृतभवने सहसा प्रविशन्ति जनाः बहिःव्याप्ताच्छीतवातात् सन्त्रस्ताः। ताभ्यां हि प्रायः जनाः प्रतिश्यायग्रस्ता भवन्ति।**

स्वेदवाहिस्रोतस् को दूषित करने वाले इन सभी निदानों का प्रतिश्याय में भी कार्यकारित्व है, विशेष रूप से तो शीत एवं ऊष्ण का क्रमपूर्वक सेवन नहीं करने से प्रायः प्रतिश्याय की उत्पत्ति होती है। वर्तमानकाल में तो लोग शीत एवं उष्ण का क्रमरहित सेवन करते ही हैं। निश्चित रूप से वे बहु प्रचलित चाय नामक उष्णपेय के पहले अत्यधिक शीतल जल का सेवन करते हैं। ग्रीष्मकाल में प्रायः 'ए.सी.' इस नाम के यंत्र से ठंडे किए गए भवन से सहसा बाहर जाते हैं एवं ऊष्ण वातावरण से शीतल किए गए भवन में आते हैं। इस प्रकार से ही ऊष्ण काल में भी हीटर नामक ऊष्मा का प्रसार करने वाले यंत्र से ऊष्ण किए गए भवन में बाहर व्याप्त शीत वायु से संतप्त लोग सहसा प्रवेश करते हैं, इन दोनों के कारण लोग प्रायः प्रतिश्याय से ग्रस्त हो जाते हैं।

**आचार्यश्चरकः कथयति यद् रोगो ह्ययं बहूनां कासश्वासक्षयशोषादिरोगाणां हेत्वात्मको भवत्यत एव न ह्येषः सामान्यो विकारोऽपितु घोर एव, यथा-**

**घ्राणमूले स्थितः श्लेष्मा रुधिरं पित्तमेव वा।**
**मारुताध्मातशिरसो मारुतं श्यायते प्रति।।**
**प्रतिश्यायस्ततो घोरो जायते देहकर्शनः।**
**( च.चि. ८/४८ )**

आचार्य चरक कहते हैं कि यह रोग कास, श्वास, क्षय एवं शोषादि रोगों के हेतुस्वरूप में होता है, अतः यह सामान्य विकार नहीं है अपितु भयंकर (घोर) विकार है, जैसे कि-

घ्राण के मूल में स्थित श्लेष्मा, रुधिर अथवा पित्त ये वायु से पूर्ण सिर वाले व्यक्ति के मारुत की ओर गमन करते हैं, इससे देह को कृश करने वाला घोर (भयंकर) प्रतिश्याय हो जाता है ।

**लक्षणानि-**

**लक्षणानि तु प्रतिश्यायस्यैतानि सन्ति-**

**तस्य रूपं शिरःशूलं, शरीरगौरवं, गन्धाज्ञानादिरूपः द्रवास्रावस्वरूपकश्च घ्राणविप्लवः, ज्वरः, कासः, कफोत्क्लेशः, स्वरभेदोऽरुचिः क्लमः, इन्द्रियाणामसामर्थ्यञ्च भवन्ति विशेषेण। वर्तमानकाले जनपदोद्ध्वंसरूपे सङ्क्रमणमाध्यमेन प्रसृते दुर्दान्ते कृच्छ्रसाध्ये कोरोनानामके विकारे तद्भेद 'ओमिक्रोन्' व्याधावपि च प्रतिश्यायः स्वरभेदश्च प्रमुखलक्षणरूपेण प्रादुर्भूत्वा कष्टमापादयतः।**

प्रतिश्याय के लक्षण तो ये हैं-

उसके लक्षण शिरःशूल, शरीर में भारीपन, गन्ध का ज्ञान न होना इत्यादि तथा द्रवात्मक स्रावस्वरूपक घ्राणविप्लव (सूंघनेकी क्रियाओं इत्यादि का नाश), ज्वर, कास, कफोत्क्लेश (कफ का आना ), स्वरभेद, अरुचि, क्लम (अनावश्यक थकान), इन्द्रियों में असमर्थता विशेष रूप से हो जाती है। वर्तमानकाल में जनपदोद्ध्वंसरूप में सङ्क्रमण के माध्यम से फैले हुए दुर्दांत कृच्छ्रसाध्य कोरोनावायरस एवं उसके भेद 'ओमिक्रोन्' नामक व्याधि में भी प्रतिश्याय एवं स्वरभेद प्रमुख लक्षण के रूप में उत्पन्न होकर कष्ट उत्पन्न करते हैं।

**रोगाणां बहूनां हेतुत्वेऽपि प्रतिष्ठितोऽयं प्रतिश्यायः।**

**ऊर्ध्वजत्रुगतानां रोगाणां वर्णनं शालाक्यतन्त्रेऽभिधीयते, तत्राप्यन्यरोगाणां समुत्पत्तावस्य हेतुत्वं प्राधान्यञ्च ख्यापितम्,यथा- रोगो ह्ययमूर्ध्वजत्रुगतोऽपि सर्वशरीरगतानां भयङ्कराणां रोगाणां समुत्पादने महत्याः भूमिकायाः निर्वहनन्तु करोत्येव। आचार्यश्चरकः निगदति, यथा हि -**

**प्रतिश्यायाद्भवेत्कासः कासात्सञ्जायते क्षयः।**
**क्षयो रोगस्य हेतुत्वे शोषस्याप्युपलभ्यते।।**
**( च.नि. ८/१९ )**

यह प्रतिश्याय अनेक रोगों के हेतु के रूप में भी प्रतिष्ठित है। ऊर्ध्वजत्रुगत रोगों का वर्णन शालाक्यतंत्र में किया जाता है, वहां भी अन्य रोगों की उत्पत्ति में इस का हेतुत्व और प्राधान्य बताया गया है । यह रोग ऊर्ध्वजत्रुगत होते हुए भी सर्वशरीरगत भयंकर रोगों की उत्पत्ति में महती भूमिका का निर्वहन तो करता ही है। आचार्य चरक कहते हैं कि-

प्रतिश्याय से कास होता है और कास से क्षय उत्पन्न हो जाता है, शोषरोग की हेतुता में तो क्षयरोग उपलब्ध होता है अर्थात् क्षय के कारण शोषरोग की उत्पत्ति होती है ।

**पश्चादपि च तेषां दुर्दान्तानां रोगाणां यात्रा शरीरभूमिमार्गे निर्बाधरूपेण भवेदेतदर्थं केषाञ्चिद्रोगाणां पूर्वरूपात्मको ह्ययं मार्गप्रदर्शकरूपेण प्रतिष्ठितो भवति, यथा राजयक्ष्मरोगे, श्वासे कासेऽपि च। कदाचिच्चायमेभी रोगैः सहैव सारथिरूपेण सर्वदा विशिष्टलक्षणरूपेण तिष्ठति। यद्यपि राजयक्ष्मचिकित्सिते प्रतिश्याय उक्त एव, तथाऽपि तत्र यक्ष्मपूर्वरूपतयोक्तः, चिकित्सास्थाने तु स्वतन्त्रः प्रतिश्याय उच्यत इति वैशिष्ट्यं संसूचयत्यस्य रोगस्याचार्यः।**

बाद में भी उन दुर्दान्त रोगों की यात्रा शरीररूपी भूमि के मार्ग में निर्बाधरूप से होती रहे इसके लिए कुछ रोगों के पूर्वरूप के रूप में यह मार्गप्रदर्शक रूप में प्रतिष्ठित होता है, जैसे- राजयक्ष्मा नामक रोग में होता है तथा श्वास में एवं कास में भी होता है। कभी-कभी इन रोगों के साथ सारथी के रूप में विशिष्ट लक्षण के रूप में सर्वदा रहता है। यद्यपि राजयक्ष्मा की चिकित्सा नामक अध्याय में प्रतिश्याय कहा भी गया है, फिर भी उसमें यह यक्ष्मा के पूर्व रूप की दृष्टि से कहा गया है, लेकिन चिकित्सास्थान में तो स्वतंत्र प्रतिश्याय नामक रोग कहा जाता है, इस वैशिष्ट्यको आचार्य संसूचित करते हैं ।

**विभिन्नानां हेतूनामुपसेवनात् मारुताध्मातशिरसो ( मारुतपूर्णशिरसः ) जनस्य घ्राणमूले स्थितः श्लेष्मा मारुतं प्रति श्यायते ( गच्छति ), तेनोत्प्रेरितः द्रवात्मकः श्लेष्मा घ्राणात् प्रस्रवति, चिकित्सकैश्च प्रतिश्यायनाम्ना सम्बोध्यमानःप्रसिद्धो ह्ययं रोगः जनान् पीडयति ।**

विभिन्न हेतुओं के सेवन से वायुपूर्ण सिर वाले व्यक्ति के नासिका के मूल में स्थित श्लेष्मा उस बढे हुए वायु की ओर गमन करता है, उससे उत्प्रेरित हुआ द्रवस्वरूप श्लेष्मा नासिका से स्रवित होता है और चिकित्सकों के द्वारा प्रतिश्याय नाम से संबोधित किया जाता हुआ यह प्रसिद्ध रोग लोगों को पीडति करता है ।

**अपवारणोपक्रमाः-**

**अत्र केवलमपवारणोपक्रमाणामेवोल्लेखो विधीयते, निवारणोपाया उपक्रमाश्च चिकित्सकाधीनाः सन्त्यत एवास्मिँल्लेखे तेषां वर्णनमनपेक्षितम्। प्रतिश्यायस्यापवारणक्रमे तु द्विविध उपक्रमो विधेयः-**

१. हेतुपरिवर्जनम्

२. **प्रतिरक्षोपायाः**

अपवारण के उपक्रम-

यहां केवल अपवारण के उपक्रमों का ही उल्लेख किया जा रहा है, निवारण के उपाय एवं उपक्रम चिकित्सक के अधीन होते हैं, अतः इस लेख में उनका वर्णन अपेक्षित नहीं है। प्रतिश्याय के अपवारण के क्रम में दो प्रकार के उपक्रम किए जाने चाहिए।

१. हेतुपरिवर्जन

२. प्रतिरक्षा के उपाय

१. **हेतुपरिवर्जनम्-**

**ये हि हेतवोऽत्र प्रोक्तास्तेषां परिवर्जनन्त्वावश्यकं वर्तते । विशेषेण तु विहारात्मकानामतिप्रजागरणातिस्वपनदिवास्वप्नानां परिवर्जनमावश्यकमस्ति। अतिशीताम्बुसेवनं अवश्यायमपि च परिहरेत्। शीताम्बुसेवनक्रमे तु स्नानपानावगाहादीनां शीतकाले च सञ्जातवर्षासु क्लिन्नानां तुषारसमये च परिभ्रमणशीलानामनभ्यस्तानां सर्वेषामेव ग्रहणम्भवत्यनेन वचनेन। बाष्परजोधूमेषु तु बहुविधानामागन्तुहेतूनामप्यन्तर्भावो भवत्यत्र त्वसात्म्यगन्धादीनां रजसि धूमे च विद्यमानानां 'वायरस' इति नाम्ना दुर्ख्यातानां विभिन्नरोगोत्पादकानां विषाणूनामप्यन्तर्भावो जायत एव। अत एव प्रतिश्यायस्यापवारणक्रमे त्वेषां हेतूनां परिवर्जनमपेक्षितमेव।**

१. **हेतुपरिवर्जन-**

जो हेतु यहां कहे गए हैं उनका परिवर्जन तो आवश्यक होता है, विशेष रूप से तो विहारात्मक अति जागरण, अत्यधिक सोना, दिन में शयन करना इनका परिवर्जन आवश्यक है। अत्यंत शीत जल का सेवन और ओस का भी परिहार करना चाहिए। शीत जल के सेवन के क्रम में तो स्नान, पान एवं अवगाहन तथा शीतकाल में होने वाली वर्षा में भीगे हुए व्यक्तियों के एवं बर्फ गिरते समय (या ओले गिरते समय) जिनको अभ्यास नहीं है ऐसे भ्रमण करने वाले व्यक्तियों का (इन सभी का) ग्रहण इस उपर्युक्त वचन से हो जाता है। बाष्प, रज (धूल) एवं धुआँ में तो अनेक प्रकार के आगन्तु हेतुओं का भी अंतर्भाव हो जाता है। यहां असात्म्य (सहन नहीं होने वाली) गन्ध इत्यादि का तथा धूल में एवं धुआं में विद्यमान वायरस इस नाम से दुर्ख्यात विभिन्न रोगोत्पादक विषाणुओं का भी अंतर्भाव हो ही जाता है, इसलिए प्रतिश्याय के अपवारणक्रम में इन हेतुओं का परिवर्जन अपेक्षित ही है।

२. **प्रतिरक्षोपायाः-**

**बहवो हि सन्ति प्रतिरक्षोपायाः तेषु तु द्विविधावेवोपायावत्र प्रस्तूयेते-**

क. **उपक्रमाः**

ख. **औषधद्रव्याणि**

क. **उपक्रमाः**

1. **नस्यकर्म-**

**नस्यकर्मणः विशिष्टो प्रभावो भवति प्रतिश्यायादिषु शिरोरोगेषु । नस्यकर्म यथाकालं यो यथोक्तं निषेवते न तस्य चक्षुर्न घ्राणं न श्रोत्रमुपहन्यते। सर्वेन्द्रियाणां वैमल्यं भवति तानि च बलवन्त्यपि भवन्ति। विधिपूर्वकं नस्यकर्म-करणेनोर्ध्वजत्रुजाः रोगाः सहसा न प्रभवन्ति। एतन्नस्यकर्म तु चिकित्सकेनैव सम्पाद्यते। किन्तु प्रतिमर्शात्मकं नस्यकर्म तु सुगमं सर्वजनैः सर्वावस्थासु च सेवनीयं वर्तते, विधिस्त्वतिसरलः क्षणमात्र एव सम्पत्स्यमानो**

वर्तते । प्रयोगेऽस्मिन्शोष-धात्मके षड्बिन्दुतैलेऽणुतैलेऽथवाऽच्छे सर्षपतैले तिलतैले वा तर्जन्यङ्गुलिमाप्लुत्य तामङ्गुलिं नस्तः दद्यात्प्रातर्निशि च सर्वदा, तेन हि सङ्क्रमणात्मकस्य सहसा समुत्पद्यमानस्य विविधात्मकस्य च प्रतिश्यायस्य चापवारणम्भवति। यतो हि द्वारं हि शिरसो नासा तेन तद् व्याप्य स दृढतामापादयति नासिकायामत एव प्रतिश्यायादिरोगाणां सहसा सहजतया चाक्रमणं न भवति ।

२. प्रतिरक्षा के उपाय-

प्रतिरक्षा के अनेक उपाय हैं लेकिन उनमें से दो प्रकार के उपाय ही यहां प्रस्तुत किए जा रहे हैं ।

क. उपक्रम

ख. औषधद्रव्य

क. उपक्रम-

1. नस्यकर्म-

नस्यकर्म का प्रतिश्याय इत्यादि शिरोरोगों में विशिष्ट प्रभाव होता है। जो व्यक्ति नस्यकर्म कही गई विधि के अनुसार यथासमय में सेवन करता है उसके न तो चक्षु और न घ्राण तथा न ही श्रोत्र नष्ट (विकृत) होते हैं । संपूर्ण इंद्रियों की विमलता होती है और वे बलवान् भी होती हैं। विधिपूर्वक नस्यकर्म करने से पूर्व जत्रु में होने वाले रोग सहसा उत्पन्न नहीं होते हैं। यह नस्यकर्म तो चिकित्सक के द्वारा ही संपादित किया जाता है, किंतु प्रतिमर्शात्मक नस्य तो सुगम है और सभी लोगों के द्वारा संपूर्ण अवस्थाओं में सेवन करने योग्य है, इसकी विधि तो अत्यंत ही सरल एवं क्षणमात्र में ही संपादित होने वाली होती है। इस प्रयोग में औषध-स्वरूप वाले षड्-बिंदु तैल अथवा अणुतैल अथवा केवल सरसों के तैल अथवा तिल के तैल में तर्जनी उंगली को भिगोकर (डुबोकर) उस अंगुली को नासिका में प्रातः एवं रात्रि को सर्वदा ही देना चाहिए । उससे संक्रमण स्वरूपवाले सहसा उत्पन्न होने वाले अनेक प्रकार के प्रतिश्याय का अपवारण होता है, क्योंकि नासिका सिर का द्वार है, इस कारण वह तैल वहां व्याप्त होकर नासिका में दृढ़ता प्रदान करता है एवं प्रतिश्याय इत्यादि रोगों का सहजता से आक्रमण नहीं होता है।

२. धूमप्रयोगः-

दक्षचिकित्सकस्य निर्देशेन कृतधूमप्रयोगः सङ्क्रमणजनितं रजोधूमातपैश्च सम्भाव्यमानं प्रतिश्यायं बाधते नवप्रतिश्यायवतामपि च धूमं वैद्यःप्रयोजयेत्।

ख. औषधद्रव्याणि-

विशिष्टानां द्रव्याणामुपसेवनम्-

केषाञ्चिद्विशिष्टानां द्रव्याणामुपसेवनमपि प्रतिश्याय-मुपरुणद्धि, यथा हि-

- द्वे पिप्पल्यावधिश्रयेद्दुग्धे रात्रौ सेवनीये च ते पञ्चषदिनपर्यन्तं दशदिनपर्यन्तं वा ।

- प्रातःकाले येन केनापि विधिना 'अञ्जीरफलम्' आस्वादयेत् ।

- शीतकाले प्रतिदिनमेवैककाले हरिद्रासम्मिश्रितं दुग्धं पिबेद्भक्षयेच्च पिण्डखर्जूराणि मात्रया।

- वातादेत्यादीनां शुष्कफलानां सेवनं तथा मूँगफलीति नाम्ना प्रसिद्धानामपि गुडेन सह सेवनं तिलगुडसेवनञ्चापि प्रतिरक्षणङ्करोति शीतकाले शीतजनितेभ्यो व्याधिभ्यः। रसायनसेवनमपि रोगप्रतिरोधकक्षमतायामभिवृद्धिङ्करोति तत्तु वैद्य-निर्देशेनैव कर्तव्यमन्यासामपि च प्रतिश्याय-

**प्रतिरोधकानामोषधीनां प्रयोगेऽपि चिकित्सक एवाधिकृतः ।**

2. **धूमप्रयोगः-**

दक्षचिकित्सक के निर्देश से किया गया धूम प्रयोग संक्रमणजनित तथा धूल, धुआं एवं धूप से होने की संभावना वाले प्रतिश्याय को बाधित करता है एवं नवीन प्रतिश्याय वाले व्यक्तियों के लिए भी वैद्य धूम का प्रयोग करे।

**ख. औषधद्रव्य-**

**विशिष्टद्रव्यों का सेवन -**

कुछ विशिष्ट द्रव्यों का सेवन भी प्रतिश्याय को रोकता है जैसे कि-

- दो पिप्पली दूध में उबाले और रात्रि में सेवन करने योग्य वे दोनों पांच-छः दिन तक अथवा 10 दिन तक सेवन की जानी चाहिए।

- प्रातःकाल में जिस किसी भी विधि से अंजीर नामक फल को खाना चाहिए ।

- शीतकाल में प्रतिदिन ही एक समय में हरिद्रा मिला हुआ दूध पीवे और मात्रापूर्वक पिंडखजूर भी खाने चाहिए।

- बादाम इत्यादि शुष्कफलों एवं मूंगफली इस नाम से विख्यात का भी गुड़ के साथ सेवन करना और तिल तथा गुड़ का सेवन करना भी शीतकाल में शीतजनित व्याधियों से प्रतिरक्षा करता है।

- रसायनसेवन भी प्रतिरोधकक्षमता में अभिवृद्धि करता है, लेकिन वह तो वैद्य के निर्देश से ही करना चाहिए । अन्य भी प्रतिश्याय को रोकने वाली औषधियों के प्रयोग में भी चिकित्सक ही अधिकृत है।

# संस्कृत-समाचाराः

३० जनवरी, २०२२ दिनाङ्के राजस्थान-सर्वकारस्य मुख्यमन्त्रिणां **श्री अशोकगहलोत महोदयानां करकमलैः** राजस्थान-संस्कृत-अकादमीतः प्रकाशितायाः प्रोफेसर श्रीकृष्णशर्मणा सम्पादितायाः **'स्वरमङ्गला'** इति त्रैमासिक-संस्कृत-पत्रिकायाः 'प्राचीनं ज्ञान-विज्ञानम् (प्रथम-द्वितीयभागौ) इति रूपेण विशेषाङ्कयोः लोकार्पणं सञ्जातम् ।



संस्कृतविदुषां डॉ. गंगाधरभट्टानां स्मृतौ संस्थापितेन 'राजगंगा चैरिटेबल ट्रस्ट' द्वारा सीकरमण्डलान्तर्गते किशोरपुराग्रामे राजकीय-उच्च-प्राथमिक-संस्कृतविद्यालये छात्राणाम् कृते सम्पूर्ण-कक्षव्यापीनि बृहद् आस्तरणानि (CARPETS) क्रेतुं विंशतिसहस्ररूप्यकाणां (20000/-) चैक् पत्रम् (Cheque) विद्यालय-प्रधानाध्यापकाय समर्पितम्।



प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23

हार्दिक शुभकामनों सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## एस्बेस्टोस सीमेन्ट पाइप्स

सस्ता, मजबूत एवं टिकाऊ

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

एवं

निर्माता

## एस्बेस्टोस सीमेन्ट शीट्स

## छत एक, लाभ अनेक

उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें

कारखाना : हमीरगढ़ - 311025, जिला भीलवाड़ा (राजस्थान) दूरभाष: 01482-286102-07
दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673
जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566
ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

# राष्ट्रीय विचारों के लिए पढ़ें


(हिन्दी) साप्ताहिक
## पाञ्चजन्य

(English) Weekly
## ORGANISER

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites : www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क
भारत में ₹ 700/- पाञ्चजन्य • 800/- ORGANISER (साधारण डाक द्वारा)
विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

प्रसार विभाग
भारत प्रकाशन (दिल्ली) लिमिटेड
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली-110055
फोन : 011-47642000, 01, 02, ई-मेल: circ@bpdl.in

स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्ष: शंकरप्रसादशुक्ल: प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाष: २३६५७२१ पत्रसंकेत:- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाष: ०१४१-२३७१०१४

प्रतिष्ठायाम्,